इति पृष्टो हयग्रीवो मुनिना कुम्भजन्मना।
प्रहृष्टो वचनं प्राह तापसं कुम्भसंभवम्॥११॥

श्रीहयग्रीव उवाच–

लोपामुद्रापतेऽगस्त्य सावधानमनाः श्रुणु।
नाम्नां सहस्रं यन्नोक्तं कारणं तद् वदामि ते॥१२॥

रहस्यमिति मत्वाहं नोक्तवांस्ते न चान्यथा।
पुनश्च पृच्छते भक्त्या तस्मात् तत् ते वदाम्यहम्॥१३॥

ब्रूयाच्छिष्याय भक्ताय रहस्यमपि देशिकः।
भवता न प्रदेयं स्यादभक्ताय कदाचन॥१४॥

न शठाय न दुष्टाय नाविश्वासाय कर्हिचित्।
श्रीमातृभक्तियुक्ताय श्रीविद्याराजवेदिने॥१५॥

उपासकाय शुद्धाय देयं नामसहस्रकम्।
यानि नामसहस्राणि सद्यः सिद्धिप्रदानि वै॥१६॥

तन्त्रेषु ललितादेव्यास्तेषु मुख्यमिदं मुने।
श्रीविद्यैव तु मन्त्राणां तत्र कादिर्यथा परा।।१७।।

पुराणं श्रीपुरमिव शक्तीनां ललिता यथा।
श्रीविद्योपासकानां च यथा देवो वरः शिवः।।१८।।

तथा नामसहस्रेषु वरमेतत् प्रकीर्तितम्।
यथास्य पठनाद् देवी प्रीयते ललिताम्बिका।।१९।।

अन्यनामसहस्रस्य पाठान्न प्रीयते तथा।
श्रीमातुः प्रीतये तस्मादनिशं कीर्तयेदिदम्।।२०।।

बिल्वपत्रैश्चक्रराजे योऽर्चयेल्ललिताम्बिकाम्।
पद्मैर्वा तुलसीपुष्पैरेभिर्नामसहस्रकैः।।२१।।

सद्यः प्रसादं कुरुते तत्र सिंहासनेश्वरी।
चक्रधिराजमभ्यर्च्य जप्त्वा पञ्चदशाक्षरीम्।।२२।।

जपान्ते कीर्तयेन्नित्यमिदं नामसहस्रकम्।
जपपूजाद्यशक्तश्चेत् पठेन्नामसहस्रकम्।।२३।।

साङ्गार्चने साङ्गजपे यत् फलं तदवाप्नुयात्।
उपासने स्तुतीरन्याः पठेदभ्युदयो हि सः।।२४।।

इदं नामसहस्रं तु कीर्तयेन्नित्यकर्मवत्।
चक्रराजार्चनं देव्या जपो नाम्नां च कीर्तिनम्।।२५।।

भक्तस्य कृत्यमेतावदन्यदभ्युदयं विदुः।
भक्तस्यावश्यकमिदं नामसाहस्रकीर्तनम्।।२६।।

तत्र हेतुं प्रवक्ष्यामि श्रुणु त्वं कुम्भसंभव।
पुरा श्रीललितादेवी भक्तानां हितकाम्यया।।२७।।

वाग्देवीर्वशिनीमुख्याः समाहूयेदमब्रवीत्।

देव्युवाच–

वाग्देवता वशिन्याद्याः श्रुणुध्वं वचनं मम।।२८।।

भवत्यो मत्प्रसादेन प्रोल्लसद्वाग्विभूतयः
मद्भक्तानां वाग्विभूतिप्रदाने विनियोजिताः।।२९।।

मच्चक्रमस्य रहस्यज्ञा मम नामपरायणाः।
मम स्तोत्रविधानाय तस्मादाज्ञापयामि वः।।३०।।

कुरुध्वमङ्कितं स्तोत्रं मम नामसहस्रकैः।
येन भक्तैः स्तुताया मे सद्यः प्रीतिः परा भवेत्।।३१।।

हयग्रीव उवाच–

इत्याज्ञप्ता वचोदेव्यो देव्या श्रीललिताम्बया।
रहस्यैर्नामाभिर्दिव्यैश्चक्रुः स्तोत्रमनुत्तमम्।।३२।।

रहस्यनामसाहस्रमिति तद् विश्रुतं परम्!
ततः कदाचित् सदसि स्थित्वा सिंहासनेऽम्बिका।।३३।।

स्वसेवावसरं प्रादात् सर्वेषां कुम्भसंभव।
सेवार्थमागतास्तत्र ब्रह्माणीब्रह्मकोटयः।।३४।।

लक्ष्मीनारायणानां च कोटयः समुपागता।
गौरीकोटिसमेतानां रुद्राणामपि कोटयः।।३५।।

मन्त्रिणीदण्डिनीमुख्याः सेवार्थं याः समागताः।
शक्तयो विविधाकारास्तासां संख्या न विद्यते।।३६।।

दिव्यौघा मानवौघाश्च सिद्धौघाश्च समागताः।
तत्र श्रीललितादेवी सर्वेषां दर्शनं ददौ।।३७।।

तेषु दृष्टोपविष्टेषु स्वे स्वे स्थाने यथाक्रमम्।
ततः श्रीललितादेवीकटाक्षाक्षेपचोदिताः।।३८।।

उत्थाय वशिनीमुख्या बद्धाञ्जलिपुटास्तदा।
अस्तुवन्नामसाहस्रैः स्वकृतैर्ललिताम्बिकाम्।।३९।।

श्रुत्वा स्तवं प्रसन्नाभूल्ललिता परमेश्वरी।
सर्वे ते विस्मयं जग्मुर्ये तत्र सदासि स्थिताः।।४०।।

ततः प्रोवाच ललिता सदस्यान् देवातागणान्।

देव्युवाच–

ममाज्ञयैव वाग्देव्यश्चक्रुः स्तोत्रमनुत्तमम्।।४१।।

अङ्कितं नामाभिर्दिव्यैर्मम प्रीतिविधायकैः।
तत् पठध्वं सदा यूयं स्तोत्रं मत्प्रीतिवृद्धये।।४२।।

प्रवर्तयध्वं भक्तेषु मम नामसहस्रकम्।
इदं नामसहस्रं मे यो भक्तः पठते सकृत्।।४३।।

स मे प्रियतमो ज्ञेयस्तस्मै कामान् ददाम्यहम्।
श्रीचक्रं मां समभ्यर्च्य जप्त्वा पञ्चदशाक्षरीम्।।४४।।

पश्चान्नामसहस्रं मे कीर्तयेन्मम तुष्टये।
मामर्चयतु वा मा वा विद्यां जपतु वा न वा।।४५।।

कीर्तयेन्नामसाहस्रमिदं मत्प्रीतये सदा।
मत्प्रीत्या सकलान् कामाँल्लभते नात्र संशयः।।४६।।

तस्मान्नामसाहस्रं मे कीर्तयध्वं सदादरात्।

हयग्रीव उवाच–

इति श्रीललितेशानी शास्ति देवान् सहानुगान्।।४७।।

तदाज्ञया तदारभ्य ब्रह्मविष्णुमहेश्वराः।
शक्तयो मन्त्रिणीमुख्या इदं नामसहस्रकम्।।४८।।

पठन्ति भक्त्या सततं ललितापरितुष्टये।
तस्मादवश्यं भक्तेन कीर्तनीयमिदं मुने।।४९।।

आवश्यकत्वे हेतुस्ते मया प्रोक्तो मुनीश्वर।
इदानीं नामसाहस्रं वक्ष्यामि श्रद्धया श्रुणु।।५०।।

न्यास :

अस्य श्रीललितासहस्रनामस्तोत्रमालामन्त्रस्य वशिन्यादिवाग्देवता ऋषयः, अनुष्टुप् छन्दः, श्रीललितापरमेश्वरी देवता, श्रीमद्वाग्भवकूटेति बीजम्, मध्यकूटेति शक्तिः, शक्तिकूटेति कीलकम्, श्रीललितामहात्रिपुरसुन्दरीप्रसाद सिद्धिद्वारा चिन्तितफलावाप्त्यर्थे जपे विनियोगः।

ध्यानम्–

सिन्दूरारुणविग्रहां त्रिनयनां माणिक्यमौलिस्फुर-
त्तारानायकशेखरां स्मितमुखीमापीनवक्षोरुहाम्।
पाणिभ्यामलिपूर्णरत्नचषकं रक्तोत्पलं बिभ्रतीं
सौम्यां रत्नघटस्थरक्तचरणां ध्यायेत परामम्बिकाम्।।५१।।

इति श्रीब्राह्माण्डपुराणे उत्तरखण्डेश्रीहयग्रीवागस्त्यसंवादे
श्रीललितानामसहस्रपूर्वभागो नाम
प्रथमोऽध्यायः।

द्वितीयोऽध्यायः

श्रीमाता श्रीमहाराज्ञी श्रीमत्सिंहासनेश्वरी।
चिदग्निकुण्डसंभूता देवकार्यसमुद्यता।।१।।

उद्यद्भानुसहस्राभा चतुर्बाहुसमन्विता।
रागस्वरूपपाशाढ्या क्रोधाकाराङ्कुशोज्ज्वला।।२।।

मनोरूपेक्षुकोदण्डा (१०) पञ्चतन्मात्रसायका।
निजारुणप्रभापूरमज्जद्ब्रह्माण्डमण्डला।।३।।

चम्पकाशोकपुंनागसौगन्धिकलसत्कचा।
कुरुविन्दमणिश्रेणीकनत्कोटीरंमण्डिता।।४।।

अष्टमीचन्द्रविभ्राजदलिकस्थलशोभिता।
मुखचन्द्रकलङ्काभमृगनाभिविशेषका।।५।।

वदनस्मरमाङ्गल्यगृहतोरणचिल्लिका।
वक्त्रलक्ष्मीपरीवाहचलन्मीनाभलोचना।।६।।

नवचम्पकपुष्पाभनासादण्डविराजिता।
ताराकान्तितिरस्कारिनासाभरणभासुरा (२०)।।७।।

कदम्बमञ्जरीक्लृप्तकर्णपूरमनोहरा।
ताटङ्कयुगलीभूततपनोडुपमण्डला।।८।।

पद्मरागशिलादर्शपरिभाविकपोलभूः।
नवविद्रुमबिम्बश्रीन्यक्कारिरदनच्छदा।।९।।

शुद्धविद्याङ्कुराकारद्विजपङ्क्तिद्वयोज्ज्वला।
कर्पूरवीटिकामोदसमाकर्षद्दिगन्तरा।।१०।।

निजसंलापमाधुर्यविनिर्भर्त्सितकच्छपी।
मन्दस्मितप्रभापूरमज्जत्कामेशमानसा॥११॥

अनाकलितसादृश्यचिबुकश्रीविराजिता।
कामेशबद्धमाङ्गल्यसूत्रशोभितकंधरा(३०)॥१२॥

कनकाङ्गदकेयूरकमनीयभुजान्विता।
रत्नग्रैवेयचिन्ताकलोलमुक्ताफलान्विता॥१३॥

कामेश्वरप्रेमरत्नमणिप्रतिपणस्तनी।
नाभ्यालवालरोमालिलताफलकुचद्वयी॥१४॥

लक्ष्यरोमलताधारतासमुन्नेयमध्यमा।
स्तनभारदलन्मध्यपट्टबन्धवलित्रया॥१५॥

अरुणारुणकौसुम्भवस्त्रभास्वत्कटीतटी।
रत्नकिङ्किणिकारम्यरशनादामभूषिता॥१६॥

कामेशज्ञातसौभाग्यमार्दवोरुद्वयान्विता।
माणिक्यमकुटाकारजानुद्वयविराजिता (४०)॥१७॥

इन्द्रगोपपरिक्षिप्तस्मरतूणाभजङ्घिका।
गूढगुल्फा कूर्मपृष्ठजयिष्णुप्रपदान्विता॥१८॥

नखदीधितिसंछन्ननमज्जनतमोगुणा।
पदद्वयप्रभाजालपराकृतसरोरुहा॥१९॥

शिञ्जानमणिमञ्जीरमण्डितश्रीपदाम्बुजा।
मरालीमन्दगमना महालावण्यशेवधिः॥२०॥

सर्वारुणाऽनवद्याङ्गी (५८) सर्वाभरणभूषिता।
शिवकामेश्वराङ्कस्था शिवा स्वाधीनवल्लभा।।२१।

सुमेरुमध्यशृङ्गस्था श्रीमन्नगरनायिका।
चिन्तामणिगृहान्तःस्था पञ्चब्रह्मासनस्थिता।।२२।।

महापद्माटवीसंस्था कदम्बवनवासिनी (६०)।
सुधासागरमध्यस्था कामाक्षी कामदायिनी।।२३।।

देवर्षिगणसंघातस्तूयमानात्मवैभवा।
भण्डासुरवधोद्युक्तशक्तिसेनासमन्विता।।२४।।

संपत्करीसमारूढसिंधुरव्रजसेविता।
अश्वारूढाधिष्ठिताश्वकोटिकोटिभिरावृता।।२५।।

चक्रराजरथारूढसर्वायुधपरिष्कृता।
गेयचक्ररथारूढमन्त्रिणीपरिसेविता।।२६।।

किरिचक्ररथारूढदण्डनाथपुरस्कृता (७०)
ज्वालामालिनिकाक्षिप्तवाह्निप्राकारमध्यगा।।२७।।

भण्डसैन्यवधोद्युक्तशक्तिविक्रमहर्षिता।
नित्या पराक्रमाटोपनिरीक्षणसमुत्सुका।।२८।।

भण्डपुत्रवधोद्युक्तबालाविक्रमनन्दिता।
मन्त्रिण्यम्बाविरचितविषङ्गंवधतोषिता।।२९।।

विशुक्रप्राणहरणवाराहीवीर्यनन्दिता।
कामेशवरमुखालोककल्पितश्रीगणेश्वरा।।३०।।

महागणेशनिर्भिन्नविघ्नयन्त्रप्रहर्षिता।
भण्डासुरेन्द्रनिर्मुक्तशस्त्रप्रत्यस्त्रवर्षिणी।।३१।।

कराङ्गुलिनखोत्पन्ननारायणदशाकृतिः (८०)।
महापाशुपतास्त्राग्निनिर्दग्धासुरसैनिका।।३२।।

कामेश्वरास्त्रनिर्दग्धसभण्डासुरसैनिका (शुन्यका)।
ब्रह्मोपेन्द्रमहेन्द्रादिदेवसंस्तुतवैभवा।।३३।।

हरनेत्राग्निसंदग्धकामसंजीवनौषधिः।
श्रीमद्वाग्भवकूटैकस्वरूपमुखपङ्कजा।।३४।।

कण्ठाधः कटिपर्यन्तमध्यकूटस्वरूपिणी।
शक्तिकूटैकतापन्नकट्यधोभागधारिणी।।३५।।

मूलमन्त्रात्मिका मूलकूटत्रयकलेबरा।
कुलामृतैकरसिका (९०) कुलसंकेतपालिनी।।३६।।

कुलाङ्गना कुलान्तःस्था कौलिनी कुलयोगिनी।
अकुला समयान्तःस्था समयाचारतत्परा।।३७।।

मूलाधारैकनिलया ब्रह्मग्रन्थिविभेदिनी (१००)।
मणिपूरान्तरुदिता विष्णुग्रन्थिविभेदिनी।।३८।।

आज्ञाचक्रान्तरालस्था रुद्रग्रन्थिविभेदिनी।
सहस्त्राराम्बुजारूढा सुधासाराभिवर्षिणी।।३९।।

तटिल्लतासमरुचिः षट्चक्रोपरि संस्थिता।
महासक्तिः कुण्डलिनी (११०)बिसतन्तुतनीयसी।।४०।।

भवानी भावनागम्या भवारण्यकुठारिका।
भद्रप्रिया भद्रमूर्तिर्भक्तसौभाग्यदायिनी।।४१।।

भक्तिप्रिया भक्तिगम्या भक्तिवश (१२०) भयापहा।
शांभवी शारदाराध्या शर्वाणी शर्मदायिनी।।४२।।

शांकरी श्रीकरी साध्वी शरच्चन्द्रनिभानना।
शातोदरी (१३०) शान्तिमती निराधारा निरञ्जना।।४३।।

निर्लेपा निर्मला नित्या निराकारा निराकुला।
निर्गुणा निष्कला (१४०) शान्ता निष्कामा निरुपप्लवा।।४४।।

नित्यशुद्धा नित्यबुद्धा निरवद्या निरन्तरा:।
निष्कारणा निष्कलङ्का निरुपाधिर्निरीश्वरा।।४५।।

नित्यमुक्ता निर्विकारा निष्प्रपञ्चा निराश्रया।
नीरागा रागमथनी निर्मदा मदनाशिनी।।४६।।

निश्चिन्ता (१६०) निरहंकारा निर्मोहा मोहनाशिनी।
निर्ममा ममताहन्त्री निष्पापा पापनाशिनी।।४७।।

निष्क्रोधा क्रोधशमनी निर्लोभा (१७०) लोभनाशिनी।
नि:संशया संशयघ्नी निर्भवा भवनाशिनी।।४८।।

निर्विकल्पा निराबाधा निर्भेदा भेदनाशिनी।
निर्नाशा (१८०) मृत्युमथनी निष्क्रिया निष्परिग्रहा।।४९।।

निस्तुला नीलचिकुरा निरपाया निरत्यया।
दुर्लभा दुर्गमा दुर्गा (१९०) दु:खहन्त्री सुखप्रदा।।५०।।

दुष्टदूरा दुराचारशमनी दोषवर्जिता।
सर्वज्ञा सान्द्रकरुणा समानाधिकवर्जिता।।५१।।

सर्वशक्तिमयी सर्वमङ्गला (२००) सद्गतिप्रदा।
सर्वेश्वरी सर्वमयी सर्वमन्त्रस्वरूपिणी।।५२।।

सर्वयन्त्रात्मिका सर्वतन्त्ररूपा मनोन्मनी।
माहेश्वरी महादेवी महालक्ष्मी-(२१०) मृडप्रिया।।५३।।

महारूपा महापूज्या महापातकनाशिनी।
महामाया महासत्त्वा महाशक्तिर्महारतिः।।५४।।

महाभोगा महैश्वर्या (२००) महावीर्या महाबला।
महाबुद्धिर्महासिद्धिर्महायोगेश्वरेश्वरी।।५५।।

महातन्त्रा महामन्त्रा महायन्त्रा महासना।
महायागक्रमाराध्या (२३०) महाभैरवपूजित।।५६।।

महेश्वरमहाकल्पमहाताण्डवसाक्षिणी।
महाकामेशमहिषी महात्रिपुरसुन्दरी।।५७।।

चतुःषष्ट्युपचाराढ्या चतुः षष्टिकलामयी।
महाचतुः षष्टिकोटियोगिनीगणसेविता।।५८।।

मनुविद्या चन्द्रविद्या चन्द्रमण्डलमध्यगा(२४०)।
चारुरूपा चारुहासा चारुचन्द्रकलाधरा।।५९।।

चराचरजगन्नाथा चक्रराजनिकेतना।
पार्वती पद्मनयना पद्मरागसमप्रभा।।६०।।

पञ्चप्रेतासनासीना पञ्चब्रह्मस्वरूपिणी।(२५०)
चिन्मयी परमानन्दा विज्ञानघनरूपिणी।।६१।।

ध्यानध्यातृध्येयरूपा धर्माधर्मविवर्जिता।
विश्वरूपा जागरिणी स्वपन्ती तैजसात्मिका।।६२।।

सुप्ता (२६०) प्राज्ञात्मिका तुर्या सर्वावस्थाविवर्जिता।
सृष्टिकर्त्री ब्रह्मरूपा गोप्त्री गोविन्दरूपिणी।।६३।।

संहारिणी रुद्ररूपा तिरोधानकरी (२७०) (ई)श्वरी।
सदाशिवाऽनुग्रहदा पञ्चकृत्यपरायणा।।६४।।

भानुमण्डलमध्यस्था भैरवी भगमालिनी।
पद्मासना भगवती पद्माभसहोदरी (२८०)।।६५।।

उन्मेषनिमिषोत्पन्नविपन्नभुवनावलिः।
सहस्रशीर्षवदना सहस्राक्षी सहस्रपात्।।६६।।

आब्रह्मकीटजननी वर्णाश्रमविधायिनी।
निजाज्ञारूपनिगमा पुण्यापुण्यफलप्रदा।।६७।।

श्रुतिसीमन्तसिन्दूरीकृतपादाब्जधूलिका।
सकलागमसंदोहशुक्तिसंपुटमौक्तिका(२९०)।।६८।।

पुरुषार्थप्रदा पूर्णा भोगिनी भुवनेश्वरी।
अम्बिकाऽनादिनिधना हरिब्रह्मेन्द्रसेविता।।६९।।

नारायणी नादरूपा नामरूपविवर्जिता(३००)।
ह्रींकारी ह्रीमती हृद्या हेयोपादेयवर्जिता।।७०।।

राजराजार्चिता राज्ञी रम्या राजीवलोचना।
रञ्जनी रमणी (३१०) रस्या रणत्किङ्किणिमेखला।।७१।।

रमा राकेन्दुवदना रति रूपा रतिप्रिया।
रक्षाकरी राक्षसघ्नी रामा रमणलम्पटा (३२०)।।७२।।

काम्या कामकलारूपा कदम्बकुसुमप्रिया।
कल्याणी जगतीकन्दा करुणारससागरा।।७३।।

कलावती कलालापा कान्ता कादम्बरीप्रिया(३३०)।
वरदा वामनयना वारुणीमदविह्वला।।७४।।

विश्वाधिका वेदवेद्या विन्ध्याचलनिवासिनी।
विधात्री वेदजननी विष्णुमाया विलासिनी(३४०)।।७५।।

क्षेत्रस्वरूपा क्षेत्रेशी क्षेत्रक्षेत्रज्ञपालिनी।
क्षयवृद्धिविनिर्मुक्ता क्षेत्रपालसमर्चिता।।७६।।

विजया विमला वन्द्या वन्दारुजनवत्सला।
वाग्वादिनी (३५०) वामकेशी वह्निमण्डलवासिनी।।७७।।

भक्तिमत्कल्पलतिका पशुपाशविमोचिनी।
संहृताशेषपाषण्डा सदाचारप्रवर्तिका।।७८।।

तापत्रयाग्निसंतप्तसमाह्लादनचन्द्रिका।
तरुणी तापसाराध्या तनुमध्या (३६०) तमोऽपहा।।७९।।

चितिस्तत्पदलक्ष्यार्था चिदेकरसरूपिणी।
स्वात्मानन्दलवीभूतब्रह्माद्यानन्दसंतति:।।८०।।

परा प्रत्यक्चितीरूपा पश्यन्ती परदेवता।
मध्यमा (३७०) वैखरीरूपा भक्तमानसहंसिका॥८१॥

कामेश्वरप्राणनाडी कृतज्ञा कामपूजिता।
श्रृङ्गाररससंपूर्णा जया जालन्धरस्थिता॥८२॥

ओड्याणपीठनिलया बिन्दुमण्डलवासिनी(३८०)।
रहोयागक्रमाराध्या रहस्तर्पणतर्पिता॥८३॥

सद्यः प्रसादिनी विश्वसाक्षिणी साक्षिवर्जिता।
षडङ्गदेवतायुक्ता षाड्गुण्यपरिपूरिता॥८४॥

नित्यक्लिन्ना निरुपमा निर्वाणसुखदायिनी(३९०)।
नित्याषोडशिकारूपा श्रीकण्ठार्धशरीरिणी॥८५॥

प्रभावती प्रभारूपा प्रसिद्धा परमेश्वरी।
मूलप्रकृतिरव्यक्ता व्यक्ताव्यक्तस्वरूपिणी॥८६॥

व्यापिनी (४००) विविधाकारा विद्याविद्यास्वरूपिणी।
महाकामेशनयनकुमुदाह्लादकौमुदी॥८७॥

भक्तहार्दतमोभेदभानुमद्भानुसंततिः।
शिवदूती शिवाराध्या शिवमूर्तिः शिवकरी॥८८॥

शिवप्रिया शिवपरा (४१०) शिष्टेष्टा शिष्टपूजिता।
अप्रमेया स्वप्रकाशा मनोवाचामगोचरा॥८९॥

चिच्छक्तिश्चेतनारूपा जडशक्तिर्जडात्मिका।
गायत्री (४१०) व्याहृतिः संध्या द्विजबृन्दनिषेविता॥९०॥

तत्त्वासना तत्वमयी (तत् त्वम् अयी) पञ्चकोशान्तरस्थिता।
निःसीममहिमा नित्ययौवना (४३०) मदशालिनी।।९१।।

मदधूर्णितरक्ताक्षी मदपाटलगण्डभूः।
चन्दनद्रवदिग्धाङ्गी चाम्पेयकुसुमप्रिया।।९२।।

कुशला कोमलाकारा कुरुकुल्ला कुलेश्वरी।
कुलकुण्डालया (४४०) कौलमार्गतत्परसेविता।।९३।।

कुमारगणनाथाम्बा तुष्टिः पुष्टिर्मतिर्धृतिः।
शान्तिः स्वस्तिमती कान्तिर्नन्दिनी (४५०) विघ्ननाशिनी।।९४।।

तेजोवती त्रिनयना लोलाक्षी कामरूपिणी।
मालिनी हंसिनी माता मलयाचलवासिनी।।९५।।

सुमुखी नलिनी (४६०) सुभ्रूः शोभना सुरनायिका।
कालकण्ठी कान्तिमती क्षोभिणी सूक्ष्मरूपिणी।।९६।।

वज्रेश्वरी वामदेवी वयोऽवस्थाविवर्जिता(४७०)।
सिद्धेश्वरी सिद्धविद्या सिद्धमाता यशास्विनी।।९७।।

विशुद्धचक्रनिलयाऽऽरक्तवर्णा त्रिलोचना।
खट्वाङ्गादिप्रहरणा वदनैकसमन्विता।।९८।।

पायसान्नप्रिया (४८०) त्वक्स्था पशुलोकभयंकरी।
अमृतादिमहाशक्तिसंवृता डाकिनीश्वरी।।९९।।

अनाहताब्जनिलया श्यामाभवदनद्वया।
दंष्ट्रोज्ज्वलाऽक्षमालादिधरा रुधिरसंस्थिता(४९०)।।१००।।

कालरात्र्यादिशक्त्यौघवृता स्निग्धौदनप्रिया।
महावीरेन्द्रवरदा राकिण्यम्बास्वरूपिणी॥१०१॥

मणिपूराब्जनिलया वदनत्रयसंयुता।
वज्रादिकायुधोपेता डामर्यादिभिरावृता॥१०२॥

रक्तवर्णा मांसनिष्ठा (५००) गुडान्नप्रीतमानसा।
समस्तभक्तसुखदा लाकिन्यम्बास्वरूपिणी॥१०३॥

स्वाधिष्ठानाम्बुजगता चतुर्वक्त्रमनोहरा।
शूलाद्यायुधसंपन्ना पीतवर्णाऽतिगर्विता॥१०४॥

मेदोनिष्ठा मधुप्रीता (५१०) बन्दिन्यादिसमन्विता।
दध्यन्नासक्तहृदया काकिनीरूपधारिणी॥१०५॥

मूलाधाराम्बुजारूढा पञ्चवक्त्राऽस्थिसंस्थिता।
अङ्कुशादिप्रहरणा वरदादिनिषेविता॥१०६॥

मुद्गौदनासक्तचित्ता साकिन्यम्बास्वरूपिणी।(५२०)
आज्ञाचक्राब्जनिलया शुक्लवर्णा षडानना॥१०७॥

मज्जासंस्था हंसवती मुख्यशक्तिसमन्विता।
हरिद्रान्नैकरसिका हाकिनीरूपधारिणी॥१०८॥

सहस्रदलपद्मस्था सर्ववर्णोपशोभिता।
सर्वायुधधरा (५३०) शुक्लसंस्थिता सर्वतोमुखी॥१०९॥

सर्वौदनप्रीतचित्ता याकिन्यम्बास्वरूपिणी।
स्वाहा स्वधामतिर्मेधा श्रुतिः स्मृति- (५४०) रनुत्तमा॥११०॥

पुण्यकीर्तिः पुण्यलभ्या पुण्यश्रवणकीर्तना।

पुलोमजार्चिता बन्धमोचनी बर्ब (बन्धु) रालका।।१११।।

विमर्शरूपिणी विद्या वियदादिजगत्प्रसूः(५५०)।

सर्वव्याधिप्रशमनी सर्वमृत्युनिवारिणी।।११२।।

अग्रगण्याचिन्त्यरूपा कलिकल्मषनाशिनी।

कात्यायनी कालहन्त्री कमलाक्षनिषेविता।।११३।।

ताम्बूलपूरितमुखी दाडिमीकुसुमप्रभा।(५६०)

मृगाक्षी मोहिनी मुख्या मृडानी मित्ररूपिणी।।११४।।

नित्यतृप्ता भक्तनिधिर्नियन्त्री निखिलेश्वरी।

मैत्र्यादिवासनालभ्या (५७०) महाप्रलयसाक्षिणी।।११५।।

परा शक्तिः परा निष्ठा प्रज्ञानघनरूपिणी।

माध्वीपानालसा मत्ता मातृकावर्णरूपिणी।।११६।।

महाकैलासनिलया मृणालमृदुदोर्लता।

महनीया (५८०) दयामूर्तिर्महासाम्राज्यशालिनी।।११७।।

आत्मविद्या महाविद्या श्रीविद्या कामसेविता।

श्रीषोडशाक्षरीविद्या त्रिकूटा कामकोटिका।।११८।।

कटाक्षकिङ्करीभूतकमलाकोटिसेविता(५९०)।

शिरःस्थिता चन्द्रनिभा फालस्थेन्द्रधनुःप्रभा।।११९।।

हृदयस्था रविप्रख्या त्रिकोणान्तरदीपिका।

दाक्षायणी दैत्यहन्त्री दक्षयज्ञविनाशिनी(६००)।।१२०।।

दरान्दोलितदीर्घाक्षी दरहासोज्ज्वलन्मुखी।
गुरुमूर्तिर्गुणनिधिर्गोमाता गुहजन्मभूः॥१२१॥

देवेशी दण्डनीतिस्था दहराकाशरूपिणी।
प्रतिपन्मुख्यराकान्ततिथिमण्डलपूजिता(६१०)॥१२२॥

कलात्मिका कलानाथा काव्यालापविनोदिनी।
सचामररमावाणीसव्यदक्षिणसेविता॥१२३॥

आदिशक्तिरमेयात्मा परमा पावनाकृतिः।
अनेककोटिब्रह्माण्डजननी (६२०) दिव्यविग्रहा॥१२४॥

क्लींकारी केवला गुह्या कैवल्यपददायिनी।
त्रिपुरा त्रिजगद्वन्द्या त्रिमूर्तिस्त्रिदशेश्वरी॥१२५॥

त्र्यक्षरी (६३०) दिव्यगन्धाढ्या सिन्दूरतिलकाञ्चिता।
उमा शैलेन्द्रतनया गौरी गन्धर्वसेविता॥१२६॥

विश्वगर्भा स्वर्णगर्भावरदा वागधीश्वरी(६४०)।
ध्यानगम्यापरिच्छेद्या ज्ञानदा ज्ञानविग्रहा॥१२७॥

सर्ववेदान्तसंवेद्या सत्यानन्दस्वरूपिणी।
लोपामुद्रार्चिता लोलाक्लृप्तब्रह्माण्डमण्डला॥१२८॥

अदृश्या दृश्यरहिता (६५०) विज्ञात्री वेद्यवर्जिता।
योगिनी योगदा योग्या योगानन्दा युगंधरा॥१२९॥

इच्छाशक्तिज्ञानशक्तिक्रियाशक्तिस्वरूपिणी।
सर्वाधारा सुप्रतिष्ठा (६६०) सदसद्रूपधारिणी॥१३०॥

अष्टमूर्तिरजाजैत्री लोकयात्रविधायिनी।
एकाकिनी भूमरूपा निर्द्वैता द्वैतवर्जिता।।१३१।।

अन्नदा वसुदा (६७०) वृद्धा ब्रह्मात्मैक्यस्वरूपिणी।
बृहती ब्राह्मणी ब्राह्मी ब्रह्मानन्दा बलिप्रिया।।१३२।।

भाषारूपा बृहत्सेना भावाभावविवर्जिता (६८०)।
सुखाराध्या शुभकरी शोभनासुलभा गतिः।।१३३।।

राजराजेश्वरी राज्यदा्यिनी राज्यवल्लभा।
राजत्कृपा राजपीठनिवेशितनिजाश्रिता।।१३४।।

राज्यलक्ष्मीः कोशनाथा (६९०) चतुरङ्गबलेश्वरी।
साम्राज्यदायिनी सत्यसंधा सागरमेखला।।१३५।।

दीक्षिता दैत्यशमनी सर्वलोकवंशकरी।
सर्वार्थदात्री सावित्री सच्चिदानन्दरूपिणी(७००)।।१३६।।

देशकालापरिच्छिन्ना सर्वगा सर्वमोहिनी।
सरस्वती शास्त्रमयी गुहाम्बा गुह्यरूपिणी।।१३७।।

सर्वोपाधिविनिर्मुक्ता सदाशिवपतिव्रता।
संप्रदायेश्वरी (७१०) साध्वी (साधु-ई) गुरुमण्डलरूपिणी।।
कुलोत्तीर्णा भगाराध्या माया मधुमती मही।
गणाम्बा गुह्यकाराध्या (७२०) कोमलाङ्गी गुरूप्रिया।।१३९।।

स्वतन्त्रा सर्वतन्त्रेशी दक्षिणामूर्तिरपिणी।
सनकादिसमाराध्या शिवज्ञानप्रदायिनी।।१४०।।

चित्कलानन्दकलिका प्रेमरूपा (७३०) प्रियंकरी।
नामपरायणप्रीता नन्दिविा नटेश्वरी।।१४१।।

मिथ्याजगदधिष्ठाना मुक्तिदा मुक्तिरूपिणी।
लास्यप्रिया लयकरी लज्जा (७४०) रम्भादिवन्दिता।।१४२।।

भवदावसुधावृष्टिः पापारण्यदवानला।
दौभाग्यतूलवातूला जराध्वान्तरविप्रभा।।१४३।।

भाग्याब्धिचन्द्रिका भक्तचित्तकेकिघनाघना।
रोगपर्वतदम्भोलिर्मृत्युदारुकुठारिका।।१४४।।

महेश्वरी (७५०) महाकाली महाग्रासा महाशना।
अपर्णा चण्डिका चण्डमुण्डासुरनिषूदिनी।।१४५।।

क्षाराक्षरात्मिका सर्वलोकेशी विश्वधारिणी।
त्रिवर्गदात्री (७६०) सुभगा त्र्यम्बका त्रिगुणात्मिका।।१४६।।

स्वर्गापवर्गदा शुद्धा जपापुष्पनिभाकृतिः।
ओजोवती द्युतिधरा यज्ञरूपा प्रियव्रता (७७०)।।१४७।।

दुराराध्या दुराधर्षा पाटलीकुसुमप्रिया।
महती मेरुनिलया मन्दारकुसुमप्रिया।।१४८।।

वीराराध्या विराड्रूपा विरजा विश्वतोमुखी (७८०)।
प्रत्यग्रूपा पराकाशा प्राणदा प्राणरूपिणी।।१४९।।

मार्ताण्डभैरवाराध्या मन्त्रिणीन्यस्तराज्यधूः।
त्रिपुरेशी जयत्सेना निस्त्रैगुण्या परापरा(७९०)।।१५०।।

सत्यज्ञानानन्दरूपा सामरस्यपरायणा।
कपर्दिनी कलामाला कामधुक् कामरूपिणी।।१५१।।

कलानिधिः काव्यकला रसज्ञा रसशेवधिः(८००)।
पुष्टा पुरातना पूज्या पुष्करा पुष्करेक्षणा।।१५२।।

परं ज्योतिः परं धाम परमाणुः परात्परा।
पाशहस्ता (८१०) पाशहन्त्री परमन्त्रविभेदिनी।।१५३।।

मूर्तामूर्ता नित्यतृप्ता मुनिमानसहंसिका।
सत्यव्रता सत्यरूपा सर्वान्तर्यामिणी सती (८२०)।।१५४।।

ब्रह्माणी ब्रह्मजननी बहुरूपा बुधार्चिता।
प्रसवित्री प्रचण्डाज्ञा प्रतिष्ठा प्रकटाकृतिः (८३०)।।१५५।।

प्राणेश्वरी प्राणदात्री पञ्चाशत्पीठरूपिणी।
विश्रृङ्खला विविक्तस्था वीरमाता वियत्प्रसूः।।१५६।।

मुकुन्दा मुक्तिनिलया मूलविग्रहरूपिणी(८४०)।
भावज्ञा भवरोगघ्नी भवचक्रप्रवर्तिनी।।१५७।।

छन्दःसारा शास्त्रसारा मन्त्रसारा तलोदरी।
उदारकीर्तिरुद्दामवैभवा वर्णरूपिणी(८५०)।।१५८।।

जन्ममृत्युजरातप्तजनविश्रान्तिदायिनी।
सर्वोपनिषदुद्घुष्टा शान्त्यतीतकलात्मिका।।१५९।।

गम्भीरा गगनान्तःस्था गर्विता गानलोलुपा।
कल्पनारहिता काष्ठा कान्ता (८६०) कान्तार्धविग्रहा।।१६०।।

कार्यकारणनिर्मुक्ता कामकेलितरङ्गिता।
कनत्कनकताटङ्का लीलाविग्रहधारिणी॥१६१॥

अजा क्षयविनिर्मुक्ता मुग्धा क्षिप्रप्रसादिनी।
अन्तर्मुखसमाराध्या (८७०) बहिर्मुखसुदुर्लभा॥१६२॥

त्रयी त्रिवर्गनिलया त्रिस्था त्रिपुरमालिनी।
निरामया निरालम्बा स्वात्मारामा सुधासृतिः॥१६३॥

संसारपङ्कनिर्मग्नसमुद्धरणपण्डिता(८८०)
यज्ञप्रिया यज्ञकर्त्री यजमानस्वरूपिणी॥१६४॥

धर्माधारा धनाध्याक्षा धनधान्यविवर्धिनीं।
विप्रप्रिया विप्ररूपा विश्वभ्रमणकारिणी॥१६५॥

विश्वग्रासा (८९०) विद्रुमाभा वैष्णवी विष्णुरूपिणी।
अयोनिर्योनिनिलया कूटस्था कुलरूपिणी॥१६६॥

वीरगोष्ठीप्रिया वीरा नैष्कर्म्या (९००) नादरूपिणी।
विज्ञानकलना कल्या विदग्धा बैन्दवासना॥१६७॥

तत्वाधिका तत्त्वमयी तत्त्वमर्थस्वरूपिणी।
सामगानप्रिया सौम्या (९१०) सदाशिवकुटुम्बिनी॥१६८॥

सव्यापसव्यमार्गस्था सर्वापद्विनिवारिणी।
स्वस्था स्वभावनधुरा धीरा धीरसमार्चिता॥१६९॥

चैतर्न्यासमाराध्या चैतन्यकुसुमप्रिया।
सदोदिता (९२०) सदा तुष्टा तरुणादित्यपाटला॥१७०॥

दक्षिणादक्षिणाराध्या दलस्मेरमुखाम्बुजा।
कौलिनीकेवलानर्घ्यकैवल्यपददायिनी।।१७१।।

स्तोत्रप्रिया स्तुतिमती श्रुतिसंस्तुतवैभवा।
मनस्विनी (९३०) मानवती महेशी मङ्गलाकृतिः।।१७२।।

विश्वमाता जगद्धात्री विशालाक्षी विरागिणी।
प्रगल्भा परमोदारा परामोदा (९४०) मनोमयी।।१७३।।

व्योमकेशी विमानस्था वज्रिणी वामकेश्वरी।
पञ्चयज्ञप्रिया पञ्चप्रेतमञ्चाधिशायिनी।।१७४।।

पञ्चमी पञ्चभूतेशी पञ्चसंख्योपचारिणी (९५०)
शाश्वती शाश्वतैश्वर्या शर्मदा शंभुमोहिनी।।१७५।।

धरा धरसुता धन्या धर्मिणी धर्मवर्धिनी।
लोकातीता (९३०) गुणातीता सर्वातीता शमात्मिका।।१७६।।

बन्धूककुसुमप्रख्या बाला लीलाविनोदिनी।
सुमङ्गली सुखकरी सुवेषाढ्या सुवासिनी(९७०)।।१७७।।

सुवासिन्यर्चनप्रीता शोभना शुद्धमानसा।
बिन्दुतर्पणसंतुष्टा पूर्वजा त्रिपुराम्बिका।।१७८।।

दशमुद्रासमाराध्या त्रिपुराश्री वशङ्करी।
ज्ञानमुद्रा ज्ञानगम्या ज्ञानज्ञेयस्वरूपिणी।।१७९।।

योनिमुद्रा त्रिखण्डेशी त्रिगुणाम्बा त्रिकोणगा।
अनवद्याऽद्भुतचारित्र वाञ्छितार्थ प्रदायिनी।।१८०।।

अभ्यासातिशयज्ञाता षडध्वातीतरूपिणी।
अव्याजकरूणामूर्तिरज्ञानध्वान्त दीपिका।।१८१।।

आबालगोपविदिता सर्वानुल्लङ्घ्यशासना।।
श्रीचक्रराजनिलया श्रीमत्रिपुरसुन्दरी।।१८२।।

श्री शिवा शिवशक्त्यैक्यरूपिणी ललिताम्बिका।
एवं श्री ललितादेव्या नाम्नां साहस्त्रकं जगुः।।१८३।।

श्रीललितासहस्त्रनामस्तोत्रकथनं नाम द्वितीयोध्यायः।।

उत्तरभागः

तृतीयोऽध्यायः।

फलश्रुतिः

इत्येतन्नामसाहस्त्रं कथितं ते घटोद्भव।
रहस्यानां रहस्यं च ललिताप्रीतिदायकम्।।१।।

अनेन सदृशं स्तोत्रं न भूतं न भविष्यति।
सर्वरोगप्रशमनं सर्वसंपत्प्रवर्धनम्।।२।।

सर्वापमृत्युशमनं कालमृत्युनिवारणम्।
सर्वज्वरार्तिशमनं दीर्घायुष्यप्रदायम्।।३।।

पुत्रप्रदमपुत्राणां पुरुषार्थप्रदायकम्।
इदं विशेषाच्छ्रीदेव्याः स्तोत्रं प्रीतिविधायकम्।।४।।

जपेन्नित्यं प्रयत्नेन ललितोपास्तितत्परः।
प्रातः स्नात्वा विधानेन संध्याकर्म समाप्य च।।५।।

पूजागृहं ततो गत्वा चक्रराजं समर्चयेत्।
विद्यां जपेत् सहस्रं वा त्रिशतं शतमेव वा॥६॥

रहस्यनामसाहस्रमिदं पश्चात् पठेन्नरः।
जन्ममध्ये सकृच्चापि य एतत् पठते सुधीः॥७॥

तस्य पुण्यफलं वक्ष्ये श्रृणु त्वं कुम्भसंभव।
गङ्गादिसर्वतीर्थेषु यः स्नायात् कोटिजन्मसु॥८॥

कोटिलिङ्गप्रतिष्ठा च यः कुर्यादविमुक्तके।
कुरुक्षेत्रे तु यो दद्यात् कोटिवारं रविग्रहे॥९॥

कोटि सुवर्णभाराणां श्रोत्रियेषु द्विजन्मसु।
यः कोटिं हयमेधानामाहरेद् गाङ्गरोधसि॥१०॥

आचरेत् कूपकोटीर्यो निर्जले मरुभूतले।
दुर्भिक्षे यः प्रतिदिनं कोटिब्राह्मणभोजनम्॥११॥

श्रद्धया परया कुर्यात् सहस्रपरिवत्सरान्।
तत्पुण्यकोटिगुणितं लभेत् पुण्यमनुत्तमम्॥१२॥

रहस्यनामसाहस्रे नाम्नेऽप्येकस्य कीर्तनात्।
रहस्यनामसाहस्रे नामैकमपि यः पठेत्॥१३॥

तस्य पापानि नश्यन्ति महान्त्यपि न संशयः।
नित्यकर्माननुष्ठानान्निषिद्धकरणादपि॥१४॥

यत् पापं जायते पुंसां तत् सर्वं नश्यति द्रुतम्।
बहुनात्र किमुक्तेन श्रुणु त्वं कलशीसुत॥१५॥

अत्रैकनाम्नो या शक्तिः पातकानां निवर्तने।
तन्निवर्त्यमघं कर्तुं नालं लोकाश्चतुर्दश॥१६॥

यस्त्यक्त्वा नामसाहस्रं पापहानिमभीप्सति।
स हि शीतनिवृत्त्यर्थं हिमशैलं निषेवते॥१७॥

भक्तो यः कीर्तयेन्नित्यमिदं नामसहस्रकम्।
तस्मै श्रीललितादेवी प्रीताभीष्टं प्रयच्छति॥१८॥

अकीर्तयन्निदं स्तोत्रं कथं भक्तो भविष्यति।
नित्यं संकीर्तनाशक्तः कीर्तयेत् पुण्यवासरं॥१९॥

संक्रान्तौ विषुवे चैव स्वजन्मत्रितयेऽयने।
नवम्यां वा चतुर्दश्यां सितायां शुक्रवासरे॥२०॥

कीर्तयेन्नामसाहस्रं पौर्णमास्यां विशेषतः।
पौर्णमास्यां चन्द्रबिम्बे ध्यात्वा श्रीललिताम्बिकाम्॥२१॥

पञ्चोपचारैः संपूज्य पठेन्नामसहस्रकम्॥
सर्वे रोगाः प्रणश्यन्ति दीर्घायुष्यं च विन्दति॥२२॥

अयमायुष्करो नाम प्रयोगः कल्पचो (नो)दितः।
ज्वरार्तं शिरसि स्पृष्ट्वा पठेन्नामसहस्रकम्॥२३॥

तत्क्षणात् प्रशमं याति शिरस्तोदो ज्वरोऽपि च।
सर्वव्याधिनिवृत्त्यर्थं स्पृष्ट्वा भस्म जपेदिदम्॥२४॥

तद्भस्मधारणादेव नश्यन्ति व्याधयः क्षणात्।
जलं संमन्त्र्य कुम्भस्थं नामसाहस्रतो मुने॥२५॥

अभिषिञ्चेद् ग्रहग्रस्तान् ग्रहा नश्यन्ति तत्क्षणात्।
सुधासागरमध्यस्थां ध्यात्वा श्रीललिताम्बिकाम्।।२६।।

यः पठेन्नामसाहस्रं विषं तस्य विनश्यति।
वन्ध्यानां पुत्रलाभाय नामसाहस्रमन्त्रितम्।।२७।।

नवनीतं प्रदद्यात्तु पुत्रलाभो भवेद् ध्रुवम्।
देव्याः पाशेन संबद्धामाकृष्टामङ्कुशेन च।।२८।।

ध्यात्वाभीष्टां स्त्रियं रात्रौ जपेन्नामसहस्रकम्।
आयाति स्वसमीपं सा यद्यप्यन्तःपुरं गता।।२९।।

राजाकर्षणकामश्चेद् राजावसथदिङ्मुखः।
त्रिरात्रं यः पठेदेतच्छ्रीदेवीध्यानतत्परः।।३०।।

स राजा पारवश्येन तुरङ्गं वा मतङ्गजम्।
आरुह्यायाति निकटं दासवत् प्रणिपत्य च।।३१।।

तस्मै राज्यं च कोशं च ददात्येव वशं गतः।
रहस्यनामसाहस्रं यः कीर्तयति नित्यशः।।३२।।

तन्मुखालोकमात्रेण मुह्येल्लोकत्रयं मुने।
यस्त्विदं नामसाहस्रं सकृत् पठति भक्तिमान्।।३३।।

तस्य ये शत्रवस्तेषां निहन्ता शरभेश्वरः।
यो वाभिचारं कुरुते नामसाहस्रपाठके।।३४।।

निर्वर्त्य तत्क्रियां हन्यात् तं वै प्रत्यङ्गिरा स्वयम्।
ये क्रूरदृष्ट्या वीक्षन्ते नामसाहस्रपाठकम्।।३५।।

तानन्धान् कुरुते क्षिप्रं स्वयं मार्ताण्डभैरवः।
धनं यो हरते चोरैः नामसाहस्रजापिनः।।३६।।

यत्र कुत्र स्थितं वापि क्षेत्रपालो निहन्ति तम्।
विद्यासु कुरुते वादं यो विद्वान्नामजापिना।।३७।।

तस्य वाक्स्तम्भनं सद्यः करोति नकुलेश्वरी।
यो राजा कुरुते वैरं नामसाहस्रजापिना।।३८।।

चतुरङ्गबलं तस्य दण्डिनी संहरेत् स्वयम्।
यः पठेन्नामसाहस्रं षण्मासं भक्तिसंयुतः।।३९।।

लक्ष्मीश्चाञ्चल्यरहिता सदा तिष्ठति तद्गृहे।
मासमेकं प्रतिदिनं त्रिवारं यः पठेन्नरः।।४०।।

भारती तस्य जिह्वाग्रे रङ्गे नृत्यति नित्यशः।
यस्त्वेकवारं पठति पक्षमात्रमतन्द्रितः।।४१।।

मुह्यन्ति कामवशगा मृगाक्ष्यस्तस्य वीक्षणात्।
यः पठेन्नामसाहस्रं जन्ममध्ये सकृन्नरः।।४२।।

तद्दृष्टिगोचराः सर्वे मुच्यन्ते सर्वकिल्बिषैः।
यो वेत्ति नामसाहस्रं तस्मै देयं द्विजन्मने।।४३।।

अन्नं वस्त्रं धनं धान्यं नान्येभ्यस्तु कदाचन।
श्रीमन्त्रराजं यो वेत्ति श्रीचक्रं यः समर्चति।।४४।।

यः कीर्तयति नामानि तं सत्पात्रं विदुर्बुधाः।
तस्मै देयं प्रयत्नेन श्रीदेवीप्रीतिमिच्छता।।४५।।

न कीर्तयति नामानि मन्त्रराजं न वेत्ति यः।
पशुतुल्यः स विज्ञेयस्तस्मै दत्तं निरर्थकम्।।४६।।

परीक्ष्य विद्याविषये तेभ्यो दद्याद् विचक्षणः।
श्रीमन्त्रराजसदृशो यथा मन्त्रो न विद्यते।।४७।।

देवता ललितातुल्या यथा नास्ति घटोद्भव।
रहस्यनामसाहस्रतुल्या नास्ति तथा स्तुतिः।।४८।।

लिखित्वा पुस्तके यस्तु नामसाहस्रमुत्तमम्।
समर्चयेत् सदा भक्त्या तस्य तुष्यति सुन्दरी।।४९।।

बहुनात्र किमुक्तेन श्रुणु त्वं कुम्भसंभव।
नानेन सदृशं स्तोत्रं सर्वतन्त्रेषु दृश्यते।।५०।।

तस्मादुपासको नित्यं कीर्तयेदिदमादरात्।
एभिर्नामसहस्रैस्तु श्रीचक्रं योऽर्चयेत् सकृत्।।५१।।

पद्मैर्वा तुलसीपुष्पैः कल्हारैर्वा कदम्बकैः।
चम्पकैर्जातिकुसुमैर्मल्लिकाकरवीरकैः।।५२।।

उत्पलैर्बिल्वपत्रैर्वा कुन्दकेसरपाटलैः।
अन्यैः सुगन्धिकुसुमैः केतकीमाधवीमुखैः।।५३।।

तस्य पुण्यफलं वक्तुं न शक्नोति महेश्वरः।
सा वेत्ति ललितादेवी स्वचक्रार्चनजं फलम्।।५४।।

अन्ये कथं विजानीयुर्ब्रह्माद्याः स्वल्पमेधसः।
प्रतिमासं पौर्णमास्यामेभिर्नामसहस्रकैः।।५५।।

रात्रौ यश्चक्रराजस्थामर्चयेत् परदेवताम्।

स एव ललितारूपस्तद्रूपा ललिता स्वयम्।।५६।।

न तयोर्विद्यते भेदो भेदकृत् पापकृद् भवेत्।

महानवम्यां यो भक्तः श्रीदेवीं चक्रमध्यगाम्।।५७।।

अर्चयेन्नामसाहस्रैस्तस्य मुक्तिः करे स्थिता।

यस्तु नामसाहस्रेण शुक्रवारे समर्चयेत्।।५८।।

चक्रराजे महादेवीं तस्य पुण्यफलं श्रुणु।

सर्वान् कामानवाप्येह सर्वसौभाग्यसंयुतः।।५९।।

पुत्रपौत्रादिसंयुक्तो भुक्त्वा भोगान् यथोप्सितान्।

अन्ते श्रीललितादेव्याः सायुज्यमतिदुर्लभम्।।६०।।

प्रार्थनीयं शिवाद्यैश्च प्राप्नोत्येव न संशयः।

यः सहस्रं ब्राह्मणानामेभिर्नामसाहस्रकैः।।६१।।

समर्च्य भोजयेद् भक्त्या पायसापूपषड्रसैः।

तस्मै प्रीणाति ललिता स्वसाम्राज्यं प्रयच्छति।।६२।।

न तस्य दुर्लभं वस्तु त्रिषु लोकेषु विद्यते।

निष्कामः कीर्तयेद्यस्तु नामसाहस्रमुत्तमम्।।६३।।

ब्रह्मज्ञानमवाप्नोति येन मुच्येत बन्धनात्।

धनार्थी धनमाप्नोति यशोऽर्थी चाप्नुयाद्यशः।।६४।।

विद्यार्थी चाप्नुयाद् विद्यां नामसाहस्रकीर्तनात्।

नानेन सदृशं स्तोत्रं भोगमोक्षप्रदं मुने।।६५।।

कीर्तनीयमिदं तस्माद् भोगमोक्षार्थिभिर्नरैः।
चतुराश्रमनिष्ठैश्च कीर्तनीयमिदं सदा।।६६।।

स्वधर्मसमनुष्ठानवैकल्यपरिपूर्तये।
कलौ पापैकबहुले धर्मानुष्ठानवर्जिते।।६७।।

नामसंकीर्तनं मुक्त्वा नृणां नान्यत् परायणम्।
लौकिकाद् वचनान्मुख्यं विष्णुनामानुकीर्तनम्।।६८।।

विष्णुनाममसहस्राच्च शिवनामैकमुत्तमम्।
शिवनामसाहस्राच्च देव्या नामैकमुत्तमम्।।६९।।

देवीनामसहस्राणि कोटिशः सन्ति कुम्भज।
तेषु मुख्यं दशविधं नामसाहस्रमुच्यते।।७०।।

रहस्यनामसाहस्रमिदं शस्तं दशस्वपि।
तस्मात् संकीर्तयेन्नित्यं कलिदोषनिवृत्तये।।७१।।

मुख्यं श्रीमातृनामेति न जानन्ति विमोहिताः।
विष्णुनामपराः केचिच्छिवनामपराः परे।।७२।।

न कश्चिदपि लोकेषु ललितानामतत्परः।
येनान्यदेवतानाम कीर्तितं जन्मकोटिषु।।७३।।

तस्यैव भवति श्रद्धा श्रीदेवीनामकीर्तने।
चरमे जन्मनि यथा श्रीविद्योपासको भवेत्।।७४।।

नामसाहस्रपाठश्च तथा चरमजन्मनि।
यथैव विरला लोके श्रीविद्याचारवेदिनः।।७५।।

तथैव विरला गुह्यनामसाहस्रपाठकाः।
मन्त्रराजजपश्चैव चक्रराजार्चनं तथा॥७६॥

रहस्यनामपाठश्च नाल्पस्य तपसः फलम्।
अपठन्नामसाहस्रं प्रीणयेद् यो महेश्वरीम्॥७७॥

स चक्षुषा विना रूपं पश्येदेव विमूढधीः।
रहस्यनामसाहस्रं त्यक्त्वा यः सिद्धिकामुकः॥७८॥

स भोजनं विना नूनं क्षुन्निवृत्तिमभीप्सति।
यो भक्तो ललितादेव्याः स नित्यं कीर्तयेदिदम्॥७९॥

नान्यथा प्रीयते देवी कल्पकोटिशतैरपि।
तस्माद् रहस्यनामानि श्रीमातुः प्रयतः पठेत्॥८०॥

इति ते कथितं स्तोत्रं रहस्यं कुम्भसंभव।
नाविद्यावेदिने ब्रूयान्नाभक्ताय कदाचन॥८१॥

यथैव गोप्या श्रीविद्या तथा गोप्यमिदं मुने।
पशुतुल्येषु न ब्रूयाज्जनेषु स्तोत्रमुत्तमम्॥८२॥

यो ददति विमूढात्मा श्रीविद्यारहिताय च।
तस्मै कुप्यन्ति योगिन्यः सोऽनर्थः सुमहान् स्मृतः॥८३॥

रहस्यनामसाहस्रं तस्मात् संगोपयेदिदम्।
स्वतन्त्रेण मया नोक्तं तवापि कलशीसुत॥८४॥

ललिताप्रेरणेंनैव मयोक्तं स्तोत्रमुत्तमम्।
कीर्तनीयमिदं भक्त्या कुम्भयोने निरन्तरम्॥८५॥

तेन तुष्टा महादेवी तवाभीष्टं प्रदास्यति।

श्रीसूत उवाच–

इत्युक्त्वा श्रीहयग्रीवो ध्यात्वा श्रीललिताम्बिकाम्।।८६।।

आनन्दमग्नहृदयः सद्यः पुलकितोऽभवत्।।८७।।

इति श्रीब्रह्माण्डपुराणे उत्तरखण्डे श्रीहयग्रीवागस्त्यसंवादे
श्रीललितानामसहस्रफलनिरूपणं नाम
तृतीयोऽध्यायः
ललितासहस्रनामस्तोत्रं संपूर्णम्

The Vagdevatas who were responsible for the composition of Lalita-sahasra-nama-stotra, are located in the inner enclosure of Sri-chaktra; the innemost circle represents the residence of Goddess Lalit.

ललितासहस्त्रनामवली

ॐ श्रीमात्रे नमः।

ॐ श्रीमहाराज्ञ्यै नमः।

ॐ श्रीमत्सिंहासनेश्वर्यै नमः।

ॐ चिदग्निकुण्डसम्भूतायै नमः।

ॐ देवकार्यसमुद्यतायै नमः।

ॐ उद्यद्भानुहस्त्राभायै नमः।

ॐ चतुर्बाहुसमन्वितायै नमः।

ॐ रागस्वरूपपाशाढ्यायै नमः।

ॐ क्रोधाकाराङ्कुशोज्ज्वलायै नमः।

ॐ मनोरूपेक्षुकोदण्डायै नमः ।।१०।।

ॐ पञ्चतन्मात्रसायकायै नमः।

ॐ निजारुणप्रभापूरमज्ज्द्ब्रह्माण्डमण्डलायै नमः।

ॐ चम्पकाशोकपुन्नागसौगन्धिकलसत्कचायै नमः।

ॐ कुरुविन्दमणिश्रेणीकनत्कोटीरमण्डितायै नमः।

ॐ अष्टमीचन्द्रविभ्राजदलिकस्थलशोभितायै नमः।

ॐ सुखचन्द्रकलङ्काभमृगनाभिविशेषकायै नमः।

ॐ वदनस्मेरमाङ्गल्यगृहतोरणचिल्लिकायै नमः।

ॐ वक्त्रलक्ष्मीपरीवाहचलन्मीनाभलोचनायै नमः।

ॐ नवचम्पकपुष्पाभनासादण्डविराजितायै नमः।

ॐ ताराकान्तितिरस्कारिनासाभरणभासुरायै नमः ।।२०।।
ॐ कदम्बमञ्जरीक्लृप्तकर्णपूरमनोहरायै नमः।
ॐ ताटकङ्कयुगलीभूततपनोडुपमण्डलायै नमः।
ॐ पद्मरागशिलादर्शपरिभाविकपोलभुवे नमः।
ॐ नवविद्रुमबिम्बश्रीन्यक्कारिदशनच्छायै नमः।
ॐ शुद्धविद्याङ्कुराकारद्विजपङ्क्तिद्वयोज्ज्वलायै नमः।
ॐ कर्पूरवीटिकामोदसमाकर्षद्दिगन्तरायै नमः।
ॐ निजसंल्लापमाधुर्यविनिर्भर्त्सितकच्छप्यै नमः।
ॐ मन्दस्मितप्रभापूरमज्जत्कामेश मानसायै नमः।
ॐ अनाकलितसादृश्यचिबुकश्रीविराजितायै नमः।
ॐ कामेशबद्धमाङ्गल्यसूत्रशोभितकन्धरायै नमः ।।३०।।
ॐ कनकाङ्गदकेयूरकमनीयभुजान्वितायै नमः।
ॐ रत्नग्रैवेयचिन्ताकल्लोलमुक्ताफलान्वितायै नमः।
ॐ कामेश्वरप्रेमरत्नमणिप्रतिपणस्तन्यै नमः।
ॐ नाभ्यालवालरोमालिलताफलकुचद्वय्यै नमः।
ॐ लक्ष्यरोमलताधारतासमुन्नेयमध्यमायै नमः।
ॐ स्तनभारदलन्मध्यपट्टबन्धवलित्रयायै नमः।
ॐ अरुणारुणकौसुम्भवस्त्रभास्वत्कटीतट्यै नमः।
ॐ रत्नकिङ्किणिकारम्यरशनादामभूषितायै नमः।
ॐ कामेशज्ञानसौभाग्यमार्दवोरुद्वयविराजितायै नमः ।।४०।।
ॐ इन्द्रगोपपरिक्षिप्तस्मरतूणाभजङ्घिकायै नमः।
ॐ गूढगुल्फायै नमः।
ॐ कूर्मपृष्ठजयिष्णुप्रपदान्वितायै नमः।
ॐ नखदीधितिसञ्छन्ननमज्जनतमोगुणायै नमः।

ॐ पदद्वयप्रभाजालपराकृतसरोरुहायै नमः।

ॐ सिञ्जानमणिमञ्जीरमण्डितश्रीपदाम्बुजायै नमः।

ॐ मरालीमन्दगमनायै नमः।

ॐ महालावण्यशेवधये नमः।

ॐ सर्वारुणायै नमः।

ॐ अनवद्याङ्ग्यै नमः ।।५०।।

ॐ सर्वाभरणभूषितायै नमः।

ॐ शिवकामेश्वराङ्कस्थायै नमः।

ॐ शिवायै नमः।

ॐ स्वाधीनवल्लभायै नमः।

ॐ सुमेरुश्रृङ्गमध्यस्थायै नमः।

ॐ श्रीमन्नगरनायिकायै नमः।

ॐ चिन्तामणिगृहान्तः स्थायै नमः।

ॐ पञ्चब्रह्मासनस्थितायै नमः।

ॐ महापद्माटवीसंस्थायै नमः।

ॐ कदम्बवनवासिन्यै नमः।

ॐ सुधासागरमध्यस्थायै नमः।

ॐ कामाक्ष्यै नमः।

ॐ कामदायिन्यै नमः।

ॐ देवर्षिगणसङ्घातस्तूयमानात्मवैभवायै नमः।

ॐ भण्डासुरवधोद्युक्तशक्तिसेनासमन्वितायै नमः।

ॐ सम्पत्करीसमारूढसिन्धुरव्रजसेवितायै नमः।

ॐ अश्वारूढाधिष्ठिताश्वकोटिभिरावृतायै नमः।

ॐ चक्रराजस्थारूढ सर्वायुधपरिष्कृतायै नमः।

ॐ गेयचक्ररथारूढमन्त्रिणीपरिसेवितायै नमः।

ॐ किरिचक्ररथारूढदण्डनाथपुरस्कृतायै नमः ।।७०।।

ॐ ज्वालामालिनिकाक्षिप्तवह्निप्रकारमध्यगायै नमः।

ॐ भण्डसैन्यवधोद्युक्तशक्तिविक्रमहर्षितायै नमः।

ॐ नित्यापराक्रमाटोपनिरीक्षणसमुत्सुकायै नमः।

ॐ भण्डपुत्रवधोद्युक्तबालाविक्रमनन्दितायै नमः।

ॐ मन्त्रिण्यम्बाविरचितविषङ्गवधतोषितायै नमः।

ॐ विशुक्रप्राणहरणवाराहीवीर्यनन्दितायै नमः।

ॐ कामेश्वरमुखालोककल्पितश्रीगणेश्वर्यै नमः।

ॐ महागणेशनिर्भिन्नविघ्नयन्त्रप्रहर्षितायै नमः:(७८)

ॐ भण्डासुरेन्द्रनिर्मुक्तशस्त्रप्रत्यस्त्रवर्षिण्यै नमः।

ॐ कराङ्गुलिनखोत्पन्ननारायणदशाकृत्यै नमः:(८०)

ॐ महापाशुपतास्त्राग्निनिर्दग्धासुरसैनिकायै नमः।

ॐ कामेश्वरास्त्रनिर्दग्धसभण्डासुरशून्यकायै नमः।

ॐ ब्रह्मोपेन्द्रमहेन्द्रादिदेवसंस्तुतवैभवायै नमः।

ॐ हरनेत्राग्निसन्दग्धकामसञ्जीवनौषध्यै नमः।

ॐ श्रीमद्वाग्भवकूटैकस्वरूपमुखपङ्कजायै नमः।

ॐ कण्ठाधः कटिपर्यन्तमध्यकूटस्वरूपिण्यै नमः।

ॐ शक्तिकूटैकतापन्नकट्यधोभागधारिण्यै नमः।

ॐ मूलमन्त्रत्मिकायै नमः।

ॐ मूलकूटत्रयकलेवरायै नमः।

ॐ कुलामृतैकरसिकायै नमः।।९०।।

ॐ कुलसंकेतपालिन्यै नमः।

ॐ कुलाङ्गनायै नमः।

ॐ कुलान्त:स्थायै नमः।

ॐ कौलिन्यै नमः।

ॐ कुलयोगिन्यै नमः।

ॐ अकुलायै नमः।

ॐ समयान्तस्थायै नमः।

ॐ समयाचारतत्परायै नमः।

ॐ मूलाधारैकनिलयायै नमः।

ॐ ब्रह्मग्रन्थिविभेदिन्यै नमः।।१००।।

ॐ मणिपूरान्तरुदितायै नमः।

ॐ विष्णुग्रन्थिविभेदिन्यै नमः।

ॐ आज्ञाचक्रान्तरालस्थायै नमः।

ॐ रुद्रग्रन्थिविभेदिन्यै नमः।

ॐ सहस्त्राराम्बुजारूढायै नमः।

ॐ तडिल्लतासमरुच्यै नमः।

ॐ षट्चक्रोपरिसंस्थितायै नमः।

ॐ महासक्त्यै नमः।

ॐ कुण्डलिन्यै नमः।।११०।।

ॐ बिसतन्तुतनीयस्यै नमः।

ॐ भवान्यै नमः।

ॐ भावनागम्यायै नमः।

ॐ भवारण्यकुठारिकायै नमः।

ॐ भद्रप्रियायै नमः।

ॐ भद्रमूर्तये नमः।

ॐ भक्तसौभाग्यदायिन्यै नमः।

ॐ भक्तिप्रियायै नमः।

ॐ भक्तिगम्यायै नमः।

ॐ भक्तिवश्यायै नमः।।१२०।।

ॐ भयापहायै नमः।

ॐ शाम्भव्यै नमः।

ॐ शारदाराध्यायै नमः।

ॐ शर्वाण्यै नमः।

ॐ शर्मदायिन्यै नमः।

ॐ शाङ्कर्यै नमः।

ॐ श्रीकर्यै नमः।

ॐ साध्व्यै नमः।

ॐ शरच्चन्द्रनिभाननायै नमः।

ॐ शातोदर्यै नमः।।१३०।।

ॐ शान्तिमत्यै नमः।

ॐ निराधारायै नमः।

ॐ निरञ्जनायै नमः।

ॐ निर्लेपायै नमः।

ॐ निर्मलायै नमः।

ॐ नित्यायै नमः।

ॐ निराकारायै नमः।

ॐ निराकुलायै नमः।

ॐ निर्गुणायै नमः।

ॐ निष्कलायै नमः।।१४०।।

ॐ शान्तायै नमः।

ॐ निष्कामायै नमः।

ॐ निरुपप्लवायै नमः।

ॐ नित्यमुक्तायै नमः।

ॐ निर्विकारायै नमः।

ॐ निष्प्रपञ्चायै नमः।

ॐ निराश्रयायै नमः।

ॐ नित्यशुद्धायै नमः।

ॐ नित्यबुद्धायै नमः।

ॐ निरवद्यायै नमः।।१५०।।

ॐ निरन्तरायै नमः।

ॐ निष्कारणायै नमः।

ॐ निष्कलङ्कायै नमः।

ॐ निरुपाधये नमः।

ॐ निरीश्वरायै नमः।

ॐ नीरागायै नमः।

ॐ रागमथन्यै नमः।

ॐ निर्मदायै नमः।

ॐ मदनाशिन्यै नमः।

ॐ निश्चिन्तायै नमः।।१६०।।

ॐ निरहङ्कारायै नमः।

ॐ निर्मोहायै नमः।

ॐ मोहनाशिन्यै नमः।

ॐ निर्ममायै नमः।

ॐ ममताहन्त्र्यै नमः।

ॐ निष्पापायै नमः।

ॐ पापनाशिन्यै नमः।

ॐ निष्क्रोधायै नमः।

ॐ क्रोधशमन्यै नमः।

ॐ निर्लोभायै नमः।।१७०।।

ॐ लोभनाशिन्यै नमः।

ॐ निःसंशयायै नमः।

ॐ संशयघ्न्यै नमः।

ॐ निर्भवायै नमः।

ॐ भवनाशिन्यै नमः।

ॐ निर्विकल्पायै नमः।

ॐ निराबाधायै नमः।

ॐ निर्भेदायै नमः।

ॐ भेदनाशिन्ये नमः।

ॐ निर्नाशायै नमः।।१८०।।

ॐ मृत्युमथन्यै नमः।

ॐ निष्क्रियायै नमः।

ॐ निष्परिग्रहायै नमः।

ॐ निस्तुलायै नमः।

ॐ नीलचिकुरायै नमः।

ॐ निरपायायै नमः।

ॐ दुर्लभायै नमः।

ॐ दुर्गमायै नमः।

ॐ दुर्गायै नमः।।१९०।।

ॐ दु:खहन्त्र्यै नमः।

ॐ सुखप्रदायै नमः।

ॐ दुष्टदूरायै नमः।

ॐ दुराचारशमन्यै नमः।

ॐ दोषवर्जितायै नमः।

ॐ सर्वज्ञायै नमः।

ॐ सान्द्रकरुणायै नमः।

ॐ समानाधिकवर्जितायै नमः।

ॐ सर्वशक्तिमय्यै नमः।

ॐ सर्वमङ्गलायै नमः।।२००।।

ॐ सद्गतिप्रदायै नमः।

ॐ सर्वेश्वर्यै नमः।

ॐ सर्वमय्यै नमः।

ॐ सर्वमन्त्रस्वरूपिण्यै नमः।

ॐ सर्वयन्त्रात्मिकायै नमः।

ॐ सर्वतन्त्ररूपायै नमः।

ॐ मनोन्मन्यै नमः।

ॐ माहेश्वर्यै नमः।

ॐ महादेव्यै नमः।

ॐ महालक्ष्म्यै नमः।।२१०।।

ॐ मृडप्रियायै नमः।

ॐ महारूपायै नमः।

ॐ महापूज्यायै नमः।

ॐ महापातकनाशिन्यै नमः।

ॐ महामायायै नमः।

ॐ महासत्त्वायै नमः।

ॐ महाशक्त्यै नमः।

ॐ महारत्यै नमः।

ॐ महाभोगायै नमः।

ॐ महैश्वर्यायै नमः।

ॐ महावीर्यायै नमः।

ॐ महाबलायै नमः।

ॐ महाबुद्ध्यै नमः।

ॐ महासिद्ध्यै नमः।

ॐ महायोगीश्वरेश्वर्यै नमः।

ॐ महातन्त्रायै नमः।

ॐ महामन्त्रायै नमः।

ॐ महायन्त्रायै नमः।

ॐ महासनायै नमः।

ॐ महायागक्रमाराध्यायै नमः।।२३०।।

ॐ महाभैरवपूजितायै नमः।

ॐ महेश्वरमहाकल्पमहाताण्डवसाक्षिण्यै नमः।

ॐ महाकामेशमहिष्यै नमः।

ॐ महात्रिपुरसुन्दर्यै नमः।

ॐ चतुःषष्ट्युपचाराढ्यायै नमः।

ॐ चतुःषष्टिकलामय्यै नमः।

ॐ महाचतुः षष्टिकोटियोगिनीगणसेवितायै नमः।

ॐ मनुविद्यायै नमः।

ॐ चन्द्रविद्यायै नमः।

ॐ चन्द्रमण्डलमध्यगायै नमः।।२४०।।

ॐ चारुरूपायै नमः।

ॐ चारुहासायै नमः।

ॐ चारुचन्द्रकलाधरायै नमः।

ॐ चराचरजगन्नाथायै नमः।

ॐ चक्रराजनिकेतनायै नमः।

ॐ पार्वत्यै नमः।

ॐ पद्मनयनायै नमः।

ॐ पद्मरागसमप्रभायै नमः।

ॐ पञ्चप्रेतासनासीनायै नमः।

ॐ पञ्चब्रह्मस्वरूपिण्यै नमः।।२५०।।

ॐ चिन्मय्यै नम.।

ॐ परमानन्दायै नमः।

ॐ विज्ञानघनरूपिण्यै नमः।

ॐ ध्यानध्यातृध्येयरूपायै नमः।

ॐ धर्माधर्मविवर्जितायै नमः।

ॐ विश्वरूपायै नमः।

ॐ जागरिण्यै नमः।

ॐ स्वपन्त्यै नमः।

ॐ तैजसात्मिकायै नमः।

ॐ सुप्तायै नमः।।२६०।।

ॐ प्राज्ञात्मिकायै नमः।

ॐ तुर्यायै नमः।

ॐ सर्वावस्थाविवर्जितायै नमः।

ॐ सृष्टिकर्त्र्यै नमः।

ॐ ब्रह्मरूपायै नमः।

ॐ गोप्त्र्यै नमः।

ॐ गोविन्दरूपिण्यै नमः।

ॐ संहारिण्यै नमः।

ॐ रुद्ररूपायै नमः।

ॐ तिरोधानकर्य्यै नमः।।२७०।।

ॐ ईश्वर्यै नमः।

ॐ सदाशिवायै नमः।

ॐ अनुग्रहदायै नमः।

ॐ पञ्चकृत्यपरायणायै नमः।

ॐ भानुमण्डलमध्यस्थायै नमः।

ॐ भैरव्यै नमः।

ॐ भगमालिन्यै नमः।

ॐ पद्मासनायै नमः।

ॐ भगवत्यै नमः।

ॐ पद्मनाभसहोदर्यै नमः।।२८०।।

ॐ उन्मेषनिमिषोत्पन्नविपन्नभुवनावल्यै नमः।

ॐ सहस्रशीर्षवदनायै नमः।

ॐ सहस्राक्ष्यै नमः।

ॐ सहस्रपादे नमः।

ॐ आब्रह्मकीटजनन्यै नमः।

ॐ वर्णाश्रमविधायिन्यै नमः।

ॐ निजाज्ञारूपनिगमायै नमः।

ॐ पुण्यापुण्यफलप्रदायै नमः।

ॐ श्रुतिसीमन्तदूरीकृतपादब्जधूलिकायै नमः।

ॐ सकलागमसन्दोहशुक्तिसम्पुटमौक्तिकायै नमः।।२९०।।

ॐ पुरुषार्थप्रदायै नमः।

ॐ पूर्णायै नमः।

ॐ भोगिन्यै नमः।

ॐ भुवनेश्वर्यै नमः।

ॐ अम्बिकायै नमः।

ॐ अनादिनिधनायै नमः।

ॐ हरिब्रह्मेन्द्रसेवितायै नमः।

ॐ नारायण्यै नमः।

ॐ नादरूपायै नमः।

ॐ नामरूपविवर्जितायै नमः।।३००।।

ॐ ह्रींकार्यै नमः।

ॐ ह्रींमत्यै नमः।

ॐ हृद्यायै नमः।

ॐ हेयोपादेयवर्जितायै नमः।

ॐ राजराजार्चितायै नमः।

ॐ राज्ञ्यै नमः।

ॐ रम्यायै नमः।

ॐ राजीवलोचनायै नमः।

ॐ रञ्जन्यै नमः।

ॐ रमण्यै नमः।।३१०।।

ॐ रस्यायै नमः।

ॐ रणत्किङ्किणिमेखलायै नमः।

ॐ रमायै नमः।

ॐ राकेन्दुवदनायै नमः।

ॐ रतिरूपायै नमः।

ॐ रतिप्रियायै नमः।

ॐ रक्षाकर्यै नमः।

ॐ राक्षसघ्न्यै नमः।

ॐ रामायै नमः।

ॐ रमणलम्पटायै नमः।।३२०।।

ॐ काम्यायै नमः।

ॐ कामकलारूपायै नमः।

ॐ कदम्बकुसुमप्रियायै नमः।

ॐ कल्याण्यै नमः।

ॐ जगतीकन्दायै नमः।

ॐ करुणारससागरायै नमः।

ॐ कलावत्यै नमः।

ॐ कलालापायै नमः।

ॐ कान्तायै नमः।

ॐ कादम्बरीप्रियायै नमः।।३३०।।

ॐ वरदायै नमः।

ॐ वामनयनायै नमः।

ॐ वारुणीमदविह्वलायै नमः।

ॐ विश्वाधिकायै नमः।

ॐ वेदवेद्यायै नमः।

ॐ विन्ध्याचलनिवासिन्यै नमः।

ॐ विधान्यै नमः।

ॐ वेदजनन्यै नमः।

ॐ विष्णुमायायै नमः।

ॐ विलसिन्यै नमः।।३४०।।

ॐ क्षेत्रस्वरूपायै नमः।

ॐ क्षेत्रेश्यै नमः।

ॐ क्षेत्रक्षेत्रज्ञपालिन्यै नमः।

ॐ क्षयवृद्धिविनिर्मुक्तायै नमः।

ॐ क्षेत्रपालसमर्चितायै नमः।

ॐ विजयायै नमः।

ॐ विमलायै नमः।

ॐ वन्द्यायै नमः।

ॐ वन्दारुजनवत्सलायै नमः।

ॐ वाग्वादिन्यै नमः।।३५०।।

ॐ वामकेश्यै नमः।

ॐ वह्निमण्डलवासिन्यै नमः।

ॐ भक्तिमत्कल्पलतिकायै नमः।

ॐ पशुपाशविमोचिन्यै नमः।

ॐ संहृताशेषपाषण्डायै नमः।

ॐ सदाचारप्रवर्तिकायै नमः।

ॐ तापत्रयाग्निसन्तप्तसमाह्लादन चन्द्रिकायै नमः।

ॐ तरुण्यै नमः।

ॐ तापसाराध्यायै नमः।

ॐ तनुमध्यायै नमः।।३६०।।

ॐ तमोपहायै नमः।

ॐ चित्यै नमः।

ॐ तत्पदलक्ष्यार्थायै नमः।

ॐ चिदेकरसरूपिण्यै नमः।

ॐ स्वात्मानन्दलवीभूतब्रह्माद्यानन्दसन्तत्यै नमः।

ॐ परायै नमः।

ॐ प्रत्यक्चितीरूपायै नमः।

ॐ पश्यन्त्यै नमः।

ॐ परदेवतायै नमः।

ॐ मध्यमायै नमः।

ॐ वैखरीरूपायै नमः।

ॐ भक्तमानसहंसिकायै नमः।

ॐ कामेश्वरप्राणनाड्यै नमः।

ॐ कृतज्ञायै नमः।

ॐ कामपूजितायै नमः।

ॐ श्रृङ्गाररससम्पूर्णायै नमः।

ॐ जयायै नमः।

ॐ जालन्धरस्थितायै नमः।

ॐ ओड्याणपीठनिलयायै नमः।

ॐ बिन्दुमण्डलवासिन्यै नमः।।३८०।।

ॐ रहोयागक्रमाराध्यायै नमः।

ॐ रहस्तर्पणतर्पितायै नमः।

ॐ सद्यः प्रसादिन्यै नमः।

ॐ विश्वसाक्षिण्यै नमः।

ॐ साक्षिवर्जितायै नमः।

ॐ षडङ्गदेवतायुक्तायै नमः।

ॐ षाड्गुण्यपरिपूरितायै नमः।

ॐ नित्यक्लिन्नायै नमः।

ॐ निरुपमायै नमः।

ॐ निर्वाणसुखदायिन्यै नमः।।३९०।।

ॐ नित्याषोडशिकारूपायै नमः।

ॐ श्रीकण्ठार्धशरीरिण्यै नमः।

ॐ प्रभावत्यै नमः।

ॐ प्रभारूपायै नमः।

ॐ प्रसिद्धायै नमः।

ॐ परमेश्वर्यै नमः।

ॐ मूलप्रकृत्यै नमः।

ॐ अव्यक्तायै नमः।

ॐ व्यक्ताव्यक्तस्वरूपिण्यै नमः।

ॐ व्यापिन्यै नमः।।४००।।

ॐ विविधाकारायै नमः।

ॐ विद्याविद्यास्वरूपिण्यै नमः।

ॐ महाकामेशनयनकुमुदाह्लादकौमुद्यै नमः।

ॐ भक्तहार्दतमोभेदभानुमद्भानुसन्तत्यै नमः।

ॐ शिवदूत्यै नमः।

ॐ शिवाराध्यायै नमः।

ॐ शिवमूर्त्यै नमः।

ॐ शिवङ्कर्यै नमः।

ॐ शिवप्रियायै नमः।

ॐ शिवपरायै नमः।।४१०।।

ॐ शिष्टेष्टायै नमः।

ॐ शिष्टपूजितायै नमः।

ॐ अप्रमेयायै नमः।

ॐ स्वप्रकाशायै नमः।

ॐ मनोवाचामगोचरायै नमः।

ॐ चिच्छक्त्यै नमः।

ॐ चेतनारूपायै नमः।

ॐ जडशक्त्यै नमः।

ॐ जडात्मिकायै नमः।

ॐ गायत्र्यै नमः।।४२०।।

ॐ व्याहृत्यै नमः।

ॐ सन्ध्यायै नमः।

ॐ द्विजवृन्दनिषेवितायै नमः।

ॐ तत्त्वासनायै नमः।

ॐ तस्यै नमः।

ॐ तुभ्यं नमः।

ॐ अय्यै नमः।

ॐ पञ्चकोशान्तरस्थितायै नमः।

ॐ निःसीममहिम्ने नमः।

ॐ नित्ययौवनायै नमः।।४३०।।

ॐ मदशालिन्यै नमः।

ॐ मदाघूर्णितरक्ताक्ष्यै नमः।

ॐ मदपाटलगण्डभुवे नमः।

ॐ चन्दनद्रवदिग्धाङ्ग्यै नमः।

ॐ चाम्पेयकुसुमप्रियायै नमः।

ॐ कुशलायै नमः।

ॐ कोमलाकारायै नमः।

ॐ कुरुकुल्लायै नमः।

ॐ कुलेश्वर्यै नमः।

ॐ कुलकुण्डालयायै नमः।।४४०।।

ॐ कौलमार्गतत्परसेवितायै नमः।

ॐ कुमारगणनाथाम्बायै नमः।

ॐ तुष्टयै नमः।

ॐ पुष्ट्यै नमः।

ॐ मत्यै नमः।

ॐ धृत्यै नमः।

ॐ शान्त्यै नमः।

ॐ स्वस्तिमत्यै नमः।

ॐ कान्त्यै नमः।

ॐ नन्दिन्यै नमः।।४५०।।

ॐ विघ्ननाशिन्यै नमः।

ॐ तेजोवत्यै नमः।

ॐ त्रिनयनायै नमः।

ॐ लोलाक्षीकामरूपिण्यै नमः।

ॐ मालिन्यै नमः।

ॐ हंसिन्यै नमः।

ॐ मात्रे नमः।

ॐ मलयाचलवसिन्यै नमः।

ॐ सुमुख्यै नमः।

ॐ नलिन्यै नमः।।४६०।।

ॐ सुभ्रुवे नमः।

ॐ शोभनायै नमः।

ॐ सुरनायिकायै नमः।

ॐ कालकण्ठ्यै नमः।

ॐ कान्तिमत्यै नमः।

ॐ क्षोभिण्यै नमः।

ॐ सूक्ष्मरूपिण्यै नमः।

ॐ वज्रेश्वर्यै नमः।

ॐ वामदेव्यै नमः।

ॐ वयोऽवस्थाविवर्जितायै नमः।।४७०।।

ॐ सिद्धेश्वर्यै नमः।

ॐ सिद्धविद्यायै नमः।

ॐ सिद्धमात्रे नमः।

ॐ यशस्विन्यै नमः।

ॐ विशुद्धिचक्रनिलयायै नमः।

ॐ आरक्तवर्णायै नमः।

ॐ त्रिलोचनायै नमः।

ॐ खट्वाङ्गादिप्रहरणायै नमः।

ॐ वदनैकसमन्वितायै नमः।

ॐ पायसान्नप्रियायै नमः।।४८०।।

ॐ त्वक्स्थायै नमः।

ॐ पशुलोकभयङ्कर्यै नमः।

ॐ अमृतादिमहाशक्तिसंवृतायै नमः।

ॐ डाकिनीश्वर्यै नमः।

ॐ अनाहताब्जनिलयायै नमः।

ॐ श्यामाभायै नमः।

ॐ वदनद्वयायै नमः।

ॐ द्रंष्ट्रोज्ज्वलायै नमः।

ॐ अक्षमालादिधरायै नमः।

ॐ रुधिरसंस्थितायै नमः।।४९०।।

ॐ कालरात्र्यादिशक्त्यौघवृतायै नमः।

ॐ स्निग्धौदनप्रियायै नमः।

ॐ महावीरेन्द्रवरदायै नमः।

ॐ राकिण्यम्बास्वरूपिण्यै नमः।

ॐ मणिपूराब्जनिलयायै नमः।

ॐ वदनत्रयसंयुतायै नमः।

ॐ वज्रादिकायुधोपेतायै नमः।

ॐ डामर्यादिभिरावृतायै नमः।

ॐ रक्तवर्णायै नमः।

ॐ मांसनिष्ठायै नमः।।५००।।

ॐ गुडान्नप्रीतमानसायै नमः।

ॐ समस्तभक्तसुखदायै नमः।

ॐ लाकिन्यम्बास्वरूपिण्यै नमः।

ॐ स्वाधिष्ठानाम्बुजगतायै नमः।

ॐ चतुर्वक्त्रमनोहरायै नमः।

ॐ शूलाद्यायुधसम्पन्नायै नमः।

ॐ पीतवर्णायै नमः।

ॐ अतिगर्वितायै नमः।

ॐ मेदोनिष्ठायै नमः।

ॐ मधुप्रीतायै नमः।।५१०।।

ॐ बन्दिन्यादिसमन्वितायै नमः।

ॐ दध्यन्नासक्तहृदयायै नमः।

ॐ काकिनीरूपधारिण्यै नमः।

ॐ मूलाधाराम्बुजारूढायै नमः।

ॐ पञ्चवक्त्रायै नमः।

ॐ अस्थिसंस्थितायै नमः।

ॐ अङ्कुशादिप्रहरणायै नमः।

ॐ वरदादिनिषेवितायै नमः।

ॐ मुद्गौदनासक्तचित्तायै नमः।

ॐ साकिन्यम्बास्वरूपिण्यै नमः।।५२०।।

ॐ आज्ञाचक्राब्जनिलयायै नमः।

ॐ शुक्लवर्णायै नमः।

ॐ षडाननायै नमः।

ॐ मज्जासंस्थायै नमः।

ॐ हंसवती मुख्यशक्तिसमन्वितायै नमः।

ॐ हरिद्रान्नैकरसिकायै नमः।

ॐ हाकिनीरूपधारिण्यै नमः।

ॐ सहस्रदलपद्मस्थायै नमः।

ॐ सर्ववर्णोपशोभितायै नमः।

ॐ सर्वायुधधरायै नमः।।५३०।।

ॐ शुक्लसंस्थितायै नमः।

ॐ सर्वतोमुख्यै नमः।

ॐ सर्वोदनप्रीतचित्तायै नमः।

ॐ याकिन्यम्बास्वरूपिण्यै नमः।

ॐ स्वाहायै नमः।

ॐ स्वधायै नमः।

ॐ मत्यै नमः।

ॐ मेधायै नमः।

ॐ श्रुत्यै नमः।

ॐ स्मृत्यै नमः।।५४०।।

ॐ अनुत्तमायै नमः।

ॐ पुण्यकीर्त्यै नमः।

ॐ पुण्यलभ्यायै नमः।

ॐ पुण्यश्रवणकीर्तनायै नमः।

ॐ पुलोमजार्चितायै नमः।

ॐ बन्धमोचिन्यै नमः।

ॐ बन्धुरालकायै नमः।

ॐ विमर्शरूपिण्यै नमः।

ॐ विद्यायै नमः।

ॐ वियदादिजगत्प्रसवे नमः।।५५०।।

ॐ सर्वव्याधिप्रशमन्यै नमः।

ॐ सर्वमृत्युनिवारिण्यै नमः।

ॐ अग्रगण्यायै नमः।

ॐ अचिन्त्यरूपायै नमः।

ॐ कलिकल्मषनाशिन्यै नमः।

ॐ कात्यायन्यै नमः।

ॐ कालहन्त्र्यै नमः।

ॐ कमलाक्षनिषेवितायै नमः।

ॐ ताम्बूलपूरितमुख्यै नमः।

ॐ दाडिमीकुसुमप्रभायै नमः।।५६०।।

ॐ मृगाक्ष्यै नमः।

ॐ मोहिन्यै नमः।

ॐ मुख्यायै नमः।

ॐ मृडान्यै नमः।

ॐ मित्ररूपिण्यै नमः।

ॐ नित्यतृप्तायै नमः।

ॐ भक्तनिधये नमः।

ॐ नियन्त्र्यै नमः।

ॐ निखिलेश्वर्यै नमः।

ॐ मैत्र्यादिवासनालभ्यायै नमः।।५७०।।

ॐ महाप्रलयसाक्षिण्यै नमः।

ॐ पराशक्त्यै नमः।

ॐ परानिष्ठायै नमः।

ॐ प्रज्ञानघनरूपिण्यै नमः।

ॐ माध्वीपानालसायै नमः।

ॐ मत्तायै नमः।

ॐ मातृकावर्णरूपिण्यै नमः।

ॐ महाकैलासनिलयायै नमः।

ॐ मृणालमृदुदोर्लतायै नमः।

ॐ महनीयायै नमः।।५८०।।

ॐ दयामूर्त्यै नमः।

ॐ महासाम्राज्यशालिन्यै नमः।

ॐ आत्मविद्यायै नमः।

ॐ महविद्यायै नमः।

ॐ श्रीविद्यायै नमः।

ॐ कामसेवितायै नगः।

ॐ श्रीषोडशाक्षरीविद्यायै नमः।

ॐ त्रिकूटायै नमः।

ॐ कामकोटिकायै नमः।

ॐ कटाक्षकिङ्करीभूतकमलाकोटिसेवितायै नमः।।५९०।।

ॐ शिरःस्थितायै नमः।

ॐ चन्द्रनिभायै नमः।

ॐ भालस्थायै नमः।

ॐ इन्द्रधनुष्प्रभायै नमः।

ॐ हृदयस्थायै नमः।

ॐ रविप्रख्यायै नमः।

ॐ त्रिकोणान्तरदीपिकायै नमः।

ॐ दाक्षायण्यै नमः।

ॐ दैत्यहन्त्र्यै नमः।

ॐ दक्षयज्ञविनाशिन्यै नमः।।६००।।

ॐ दरान्दोलितदीर्घाक्ष्यै नमः।

ॐ दरहासोज्ज्वलन्मुख्यै नमः।

ॐ गुरुमूर्त्यै नमः।

ॐ गुणनिधये नमः।

ॐ गोमात्रे नमः।

ॐ गुहजन्मभुवे नमः।

ॐ देवेश्यै नमः।

ॐ दण्डनीतिस्थायै नमः।

ॐ दहराकाशरूपिण्यै नमः।

ॐ प्रतिपन्मुख्यराकान्ततिथिमण्डलपूजितायै नमः।।६१०।।

ॐ कलात्मिकायै नमः।

ॐ कलानाथायै नमः।

ॐ काव्यालापविनोदिन्यै नमः।

ॐ सचामररमावाणीसव्यदक्षिणसेवितायै नमः।

ॐ आदिशक्त्यै नमः।

ॐ अमेयायै नमः।

ॐ आत्मने नमः।

ॐ परमायै नमः।

ॐ पावनाकृतये नमः।

ॐ अनेककोटिब्रह्माण्डजनन्यै नमः।।६२०।।

ॐ दिव्यविग्रहायै नमः।

ॐ क्लींकार्यै नमः।

ॐ केवलायै नमः।

ॐ गुह्यायै नमः।

ॐ कैवल्यपददायिन्यै नमः।

ॐ त्रिपुरायै नमः।

ॐ त्रिजगद्वन्द्यायै नमः।

ॐ त्रिमूर्त्यै नमः।

ॐ त्रिदशेश्वर्यै नमः।

ॐ त्र्यक्षर्यै नमः।

ॐ दिव्यगन्धाढ्यायै नमः।

ॐ सिन्दूरतिलकाञ्चितायै नमः।

ॐ उमायै नमः।

ॐ शैलेन्द्रतनयायै नमः।

ॐ गौर्यै नमः।

ॐ गन्धर्वसेवितायै नमः।

ॐ विश्वगर्भायै नमः।

ॐ स्वर्णगर्भायै नमः।

ॐ अवरदायै नमः।

ॐ वागधीश्वर्यै नमः।।६४०।।

ॐ ध्यानगम्यायै नमः।

ॐ अपरिच्छेद्यायै नमः।

ॐ ज्ञानदायै नमः।

ॐ ज्ञानविग्रहायै नमः।

ॐ सर्ववेदान्तसंवेद्यायै नमः।

ॐ सत्यानन्दस्वरूपिण्यै नमः।

ॐ लोपामुद्रार्चितायै नमः।

ॐ लीलाक्लृप्तब्रह्माण्डमण्डलायै नमः।

ॐ अदृश्यायै नमः।

ॐ दृश्यरहितायै नमः।।६५०।।

ॐ विज्ञात्र्यै नमः।

ॐ वेद्यवर्जितायै नमः।

ॐ योगिन्यै नमः।

ॐ योगदायै नमः।

ॐ योग्यायै नमः।

ॐ योगानन्दायै नमः।

ॐ युगन्धरायै नमः।

ॐ इच्छाशक्तिज्ञानशक्तिक्रियाशक्ति स्वरूपिण्यै नमः।

ॐ सर्वाधारायै नमः।

ॐ सुप्रतिष्ठायै नमः।।६६०।।

ॐ सदसद्रूपधारिण्यै नमः।

ॐ अष्टमूर्त्यै नमः।

ॐ अजाजैत्र्यै नमः।

ॐ लोकयात्राविधायिन्यै नमः।

ॐ एकाकिन्यै नमः।

ॐ भूमरूपायै नमः।

ॐ निर्द्वैतायै नमः।

ॐ द्वैतवर्जितायै नमः।

ॐ अन्नदायै नमः।

ॐ वसुदायै नमः।

ॐ वृद्धायै नमः।

ॐ ब्रह्मात्मैक्यस्वरूपिण्यै नमः।

ॐ बृहत्यै नमः।

ॐ ब्राह्मण्यै नमः।

ॐ ब्राह्म्यै नमः।

ॐ ब्रह्मानन्दायै नमः।

ॐ बलिप्रियायै नमः।

ॐ भाषारूपायै नमः।

ॐ बृहत्सेनायै नमः।

ॐ भावाभावविवर्जितायै नमः।।६८०।।

ॐ सुखाराध्यायै नमः।

ॐ शुभकार्यै नमः।

ॐ शोभनासुलभागत्यै नमः।

ॐ राजराजेश्वर्यै नमः।

ॐ राज्यदायिन्यै नमः।

ॐ राज्यवल्लभायै नमः।

ॐ राजत्कृपायै नमः।

ॐ राजपीठनिवेशितनिजाश्रितायै नमः।

ॐ राज्यलक्ष्म्यै नमः।

ॐ कोशनाथायै नमः।।६९०।।

ॐ चतुरङ्गबलेश्वर्यै नमः।

ॐ साम्राज्यदायिन्यै नमः।

ॐ सत्यसन्धायै नमः।

ॐ सागरमेखलायै नमः।

ॐ दीक्षितायै नमः।

ॐ दैत्यशमन्यै नमः।

ॐ सर्वलोकवशङ्कर्यै नमः।

ॐ सर्वार्थदात्र्यै नमः।

ॐ सावित्र्यै नमः।

ॐ सच्चिदानन्दरूपिण्यै नमः।।(७००)।।

ॐ देशकालापरिच्छिन्नायै नमः।

ॐ सर्वगायै नमः।

ॐ सर्वमोहिन्यै नमः।

ॐ सरस्वत्यै नमः।

ॐ शास्त्रमय्यै नमः।

ॐ गुहाम्बायै नमः।

ॐ गुह्यरूपिण्यै नमः।

ॐ सर्वोपाधिविनिर्मुक्तायै नमः।

ॐ सदाशिवपतिव्रतायै नमः।

ॐ सम्प्रदायेश्वर्यै नमः।।७१०।।

ॐ साधुने नमः।

ॐ यै नमः।

ॐ गुरुमण्डलरूपिण्यै नमः।

ॐ कुलोत्तीर्णायै नमः।

ॐ भगाराध्यायै नमः।

ॐ मायायै नमः।

ॐ मधुमत्यै नमः।

ॐ मह्यै नमः।

ॐ गणाम्बायै नमः।

ॐ गुह्यकाराध्यायै नमः।।७२०।।

ॐ कोमलाङ्ग्यै नमः।

ॐ गुरुप्रियायै नमः।

ॐ स्वतन्त्रायै नमः।

ॐ सर्वतन्त्रेश्यै नमः।

ॐ दक्षिणामूर्तिरूपिण्यै नमः।

ॐ सनकादिसमाराध्यायै नमः।

ॐ शिवज्ञानप्रदायिन्यै नमः।

ॐ चित्कलायै नमः।

ॐ आनन्दकलिकायै नमः।

ॐ प्रेमरूपायै नमः।।७३०।।

ॐ प्रियङ्कर्यै नमः।

ॐ नामपारायणप्रीतायै नमः।

ॐ नन्दिविद्यायै नमः।

ॐ नटेश्वर्यै नमः।

ॐ मिथ्याजगदधिष्ठानायै नमः।

ॐ मुक्तिदायै नमः।

ॐ मुक्तिरूपिण्यै नमः।

ॐ लास्यप्रियायै नमः।

ॐ लयकर्यै नमः।

ॐ लज्जायै नमः।।७४०।।

ॐ रम्भादिवन्दितायै नमः।

ॐ भवदावसुधावृष्ट्यै नमः।

ॐ पापारण्यदवानलायै नमः।

ॐ दौर्भाग्यतूलवातूलायै नमः।

ॐ जराध्वान्तरविप्रभायै नमः।

ॐ भाग्याब्धिचन्द्रिकायै नमः।

ॐ भक्तचित्तकेकिघनाघनायै नमः।

ॐ रोगपर्वतदम्भोलये नमः।

ॐ मत्युदारुकुठारिकायै नमः।

ॐ महेश्वर्यै नमः।।७५०।।

ॐ महाकाल्यै नमः।

ॐ महाग्रासायै नमः।

ॐ महाशनायै नमः।

ॐ अपर्णायै नमः।

ॐ चण्डिकायै नमः।

ॐ चण्डमुण्डासुरनिषूदिन्यै नमः।

ॐ क्षराक्षरात्मिकायै नमः।

ॐ सर्वलोकेश्यै नमः।

ॐ विश्वधारिण्यै नमः।

ॐ त्रिवर्गदात्र्यै नमः।।७६०।।

ॐ सुभगायै नमः।

ॐ त्र्यम्बकायै नमः।

ॐ त्रिगुणात्मिकायै नमः।

ॐ स्वर्गापवर्गदायै नमः।

ॐ शुद्धायै नमः।

ॐ जपापुष्पनिभाकृतये नमः।

ॐ ओजोवत्यै नमः।

ॐ द्युतिधरायै नमः।

ॐ यज्ञरूपायै नमः।

ॐ प्रियव्रतायै नमः॥७७०॥

ॐ दुराराध्यायै नमः।

ॐ दुराधर्षायै नमः।

ॐ पाटलीकुसुमप्रियायै नमः।

ॐ महत्यै नमः।

ॐ मेरुनिलयायै नमः।

ॐ मन्दारकुसुमप्रियायै नमः।

ॐ वीराराध्यायै नमः।

ॐ विराड्रूपायै नमः।

ॐ विरजायै नमः।

ॐ विश्वतोमुख्यै नमः॥७८०॥

ॐ प्रत्यग्रूपायै नमः।

ॐ पराकाशायै नमः।

ॐ प्राणदायै नमः।

ॐ प्राणरूपिण्यै नमः।

ॐ मार्तण्डभैरवाराध्यायै नमः।

ॐ मन्त्रिणीन्यस्तराज्यधुरे नमः।

ॐ त्रिपुरेश्यै नमः।

ॐ जयत्सेनायै नमः।

ॐ निस्त्रैगुण्यायै नमः।

ॐ परापरायै नमः॥७९०॥

ॐ सत्यज्ञानानन्दरूपायै नमः।

ॐ सामरस्यपरायणायै नमः।

ॐ कपर्दिन्यै नमः।

ॐ कलामालायै नमः।

ॐ कामदुधे नमः।

ॐ कामरूपिण्यै नमः।

ॐ कलानिधये नमः।

ॐ लक्ष्मणाग्रज-पूजितायै नमः।।१९०।।

ॐ लभ्येतरायै नमः।।

ॐ लब्ध-भक्ति-सुलभायै नमः।।

ॐ लांगलायुधायै नमः।।

ॐ लग्न-चामर-हस्त-श्रीशारदा-परिवीजितायै नमः।।

ॐ लज्जा-पद-समाराध्यायै नमः।।

ॐ लम्पटायै नमः।।

ॐ लकुलेश्वर्यै नमः।।

ॐ लब्धमानायै नमः।।

ॐ लब्ध-रसायै नमः।।

ॐ लब्ध-सम्पत्-समुन्नत्यै नमः।।२००।।

॥ ह्रीं ॥

ॐ ह्रींकारिण्यै नम॰।।

ॐ ह्रींकाराद्यायै नमः।।

ॐ ह्रीं-मध्यायै नमः।।

ॐ ह्रीं-शिखामण्यै नमः।।

ॐ ह्रींकार-कुण्डाग्नि-शिखायै नमः।।

ॐ ह्रींकार-शशि-चन्द्रिकायै नमः।।

ॐ ह्रींकार-भास्कर-रुच्यै नमः।।

ॐ ह्रींकारांभोद-चंचलायै नमः।।

ॐ ह्रींकार-कन्दांकुरिकायै नमः।।

ॐ ह्रींकारैक-परायणायै नमः।।२१०।।

ॐ ह्रींकार-दीर्घिका-हंस्यै नमः।।

ॐ ह्रींकारोद्यान-केकिन्यै नमः।।

ॐ ह्रींकारारण्य-हरिण्यै नमः।।

ॐ ह्रींकारालवाल-वल्लर्यै नमः।।

ॐ ह्रींकार-पंजर-शुक्यै नमः।।

ॐ ह्रींकारांगण-दीपिकायै नमः।।

ॐ ह्रींकार-कन्दरा-सिंह्यै नमः।।

ॐ ह्रींकारोम्भोज-भृंगिकायै नमः।।

ॐ ह्रींकार-सुमनो-माध्व्यै नमः।।

ॐ ह्रींकार-तरु-मंजयै नमः।।२२०।।

॥ स ॥

ॐ सकाराख्यायै नमः।।

ॐ समरसायै नमः।।

ॐ सकलागम-संस्तुतायै नमः।।

ॐ सर्व-वेदान्त-तात्पर्य-भूम्यै नमः।।

ॐ सदसदाश्रयायै नमः।।

ॐ सकलायै नमः।।

ॐ सच्चिदानन्दायै नमः।।

ॐ साध्यायै नमः।।

ॐ सद्गति-दायिन्यै नमः।।

ॐ सनकादि-मुनिध्येयायै नमः।।२३०।।

ॐ सदाशिव-कुटुम्बिन्यै नमः।।

ॐ सकलाधिष्ठान-रूपाये नमः।।

ॐ सत्य-रूपायै नमः।।

ॐ समाकृत्यै नमः।।

ॐ सर्व-प्रपंच-निर्मात्र्यै नमः।।

ॐ समानाधिक-वर्जितायै नमः।।

ॐ सर्वोत्तुंगायै नमः।।

ॐ संग-हीनायै नमः।।

ॐ सद्गुणायै नमः।।

ॐ सकलेष्टदायै नमः।।२४०।।

॥ क ॥

ॐ ककारिण्यै नमः।।

ॐ काव्य-लोलायै नमः।।

ॐ कामेश्वर-मनोहरायै नमः।।

ॐ कामेश्वर-प्राणनाड्यै नमः।।

ॐ कामेशोत्संग-वासिन्यै नमः।।

ॐ कामेश्वरालिंगितांग्यै नमः।।

ॐ कामेश्वर-सुख-प्रदायै नमः।।

ॐ कामेश्वर--प्रणयिन्यै नमः।।
ॐ कामेश्वर-विलासिन्यै नमः।।
ॐ कामेश्वर-तपः सिध्यै नमः।।२५०।।
ॐ कामेश्वर-मनः प्रियायै नमः।।
ॐ कामेश्वर-प्राणनाथायै नमः।।
ॐ कामेश्वर-विमोहिन्यै नमः।।
ॐ कामेश्वर-ब्रह्मविद्यायै नमः।।
ॐ कामेश्वर-गृहेश्वर्यै नमः।।
ॐ कामेश्वराह्लाद-कर्यै नमः।।
ॐ कामेश्वर-महेश्वर्यै नमः।।
ॐ कामेश्वर्यै नमः।।
ॐ कामकोटि-निलयायै नमः।।
ॐ कांक्षितार्थ-दायै नमः।।२६०।।

॥ ल ॥

ॐ लकारिण्यै नमः।।
ॐ लब्धरूपायै नमः।।
ॐ लब्ध-धिये नमः।।
ॐ लब्ध-वांछितायै नमः।।
ॐ लब्धाहंकार-दुर्गमायै नमः।।
ॐ लब्ध-पाप-मनो-दूरायै नमः।।
ॐ लब्ध-शक्त्यै नमः।।
ॐ लब्ध-देहायै नमः।।
ॐ लब्धैश्वर्य-समुन्नत्यै नमः।।
ॐ लब्ध-वृध्द्यै नमः।।
ॐ लब्ध-लीलायै नमः।।
ॐ लब्ध-यौवन-शालिन्यै नमः।।
ॐ लब्धातिशय-सर्वांग-सौन्दर्यायै नमः।।

ॐ लब्ध-विभ्रमायै नमः।।

ॐ लब्ध-रागायै नमः।।

ॐ लब्ध-पत्यै नमः।।

ॐ लब्ध-नानागम-स्थित्यै नमः।।

ॐ लब्ध-भोगायै नमः।।

ॐ लब्ध-सुखायै नमः।।

ॐ लब्ध-हर्षाभिपूरितायै नमः।।२८०।।

॥ ह्रीं ॥

ॐ ह्रींकार-मूर्त्यै नमः।।

ॐ ह्रींकार-सौध-शृंग-कपोतिकायै नमः।।

ॐ ह्रींकार-दुग्धाब्धि-सुधायै नमः।।

ॐ ह्रींकार-कमलेन्दिरायै नमः।।

ॐ ह्रींकार-मणि-दीपार्चिषे नमः।।

ॐ ह्रींकार-तरु:शारिकायै नमः।।

ॐ ह्रींकार-पेटक-मण्यै नमः।।

ॐ ह्रींकारादर्श-बिम्बितायै नमः।।

ॐ ह्रींकार-कोशासि-लतायै नमः।।

ॐ ह्रींकारास्थान-नर्तक्यै नमः।।१९०।।

ॐ ह्रींकार-शुक्तिका-मुक्तामण्यै नमः।।

ॐ ह्रींकार-बोधितायै नमः।।

ॐ ह्रींकार-मय-सौवर्ण-स्तम्भ-विभ्रम-पुत्रिकायै नमः।।

ॐ ह्रींकार-वेदोपनिषदे नमः।।

ॐ ह्रींकाराध्वर-दक्षिणायै नमः।।

ॐ ह्रींकार-नन्दनाराम-नव-कल्पक-वल्लर्यै नमः।।

ॐ ह्रींकार-हिमवद्-गंगायै नमः।।

ॐ ह्रींकारर्णव-कौस्तुभायै नमः।।

ॐ ह्रींकार-मन्त्र-सर्वस्वायै नमः॥

ॐ ह्रींकार-पर-सौख्यदायै नमः॥

॥ इति श्रीललिता-त्रिशती-नामावलिः सम्पूर्णा ॥



LALITOPĀKYHĀNA

(from Brahmāṇḍa-purāṇa)

॥ श्रीललितोपाख्यानं ॥

चतुर्भुज चंद्रकलावतंसे कुचोन्नते कुङ्कुमरागशोणे।
पुंड्रेक्षुपाशाङ्कुशपुष्पबाणहस्ते नमस्ते जगदेकमातः॥१॥

अस्तु नः श्रेयसे नित्यं त्रस्तु वामाङ्गसुन्दरम्॥
यतस्तृतीयो विदुषां तृतीयस्तु परं महः॥२॥

INTRODUCTION

(Agastya meets Hayagrīva and discussess with him the method of eradicating the sorrow of human beings).

अगस्त्यो नाम देवर्षिर्वेदवेदाङ्गपारगः॥
सर्वसिद्धान्तसारज्ञो ब्रह्मानन्दरसात्मकः॥३॥

चचाराद्भुतहैतूनि तीर्थान्यायतनानि च॥
शैलारण्यापगामुख्या सर्वाञ्च जनपदानपि॥४॥

तेषु तेष्वखिलाञ्जंतूनज्ञानतिमिरावृतान्॥
शिश्नोदरपरान्दृष्ट्वा चिन्तयामास तान्प्रति॥५॥

तस्य चिन्तयमानस्य चरतो वसुधामिमाम्॥
प्राप्तमासीन्महापुण्यं कांचीनगरमुत्तमम्॥६॥

तत्र वारणशैलेन्द्रमेकाम्रनिलयं शिवम्॥
कामाक्षीं कलिदोषघ्नीमपूजयदथात्मवान्॥७॥

लोकहेतोर्दयार्द्रस्य धीमतश्चिन्तनो मुहुः।।
चिरकालेन तपसा तोषितोऽभूज्जनार्दनः।।८।।

हयग्रीवां तनुं कृत्वा साक्षाच्चिन्मात्रविग्रहाम्।
शङ्खचक्राक्षवलयपुस्तकोज्ज्वलबाहुकाम्।।९।।

पूरयित्रीं जगत्कृत्स्नं प्रभया देहजातया।।
प्रादुर्बभूव पुरतो मुनेरमिततेजसा।।१०।।

तं दृष्ट्वावनन्दभरितः प्रणम्य च मुहुर्मुहुः।।
विनयावनतो भूत्वा सन्तुष्टाव जगत्पतिम्।।११।।

अथो वाच जगन्नाथस्तुष्टोऽस्मि तपसा तव।।
वरं वरय भद्रं ते भविता भूसूरोत्तमः।।१२।।

इति पृष्टो भगवता प्रोंवाच मुनिसत्तमः।।
यदि तुष्टोऽसि भगवन्निमे पामरजन्तवः।।१३।।

केनोपायेन मुक्ताः स्युरेतन्मे वक्तुमर्हसि।।
इति पृष्टो द्विजेनाथ देवदेवो जनार्दनः।।१४।।

The worship of Para-Sakti is the means of securing welfare here and salvation hereafter.

एष एव पुरा प्रश्नः शिवेन चरितो मम।।
अयमेव कृतः प्रश्नो ब्रह्मणा तु ततः परम्।।१५।।

कृतो दुर्वाससा पश्चाद्भवता तु ततः परम्।।१६।।

भवद्भिः सर्वभूतानां गुरुभूतैर्महात्मभिः।।
ममोपदेशो लोकेषु प्रथितोऽस्तु वरो मम।।१७।।

अहमादिर्हि भूतानामादिकर्ता स्वयं प्रभुः।।
सृष्टिस्थितिलयानां तु सर्वेषामपि कारकः।।१८।।

त्रिमूर्तिस्त्रिगुणातीतो गुणहीनो गुणाश्रयः।।१९।।

इच्छाविहारो भूतात्मा प्रधानपुरुषात्मकः।।
एवं भूतस्य मे ब्रह्मंस्त्रिजगद्रुपधारिणः।।१०।।

द्विधाकृतमभूद्रूपं प्रधानपुरुषात्मकम्।।
मम प्रधानं यद्रूपं सर्वलोकगुणात्मकम्।।२१।।

अपरं यद्गुणातीतं परात्परतरं महत्।।
एवमेव तयोर्ज्ञात्वा मुच्यते ते उभे किमु।।२२।।

तपोभिश्चिरकालोत्थैर्मर्मैश्च नियमैरपि।।
त्यागैर्दुष्कर्मनाशांते मुक्तिराश्वेव लभ्यते।।२३।।

यद्रूपं यद्गुणयुतं तद्र‍ूप्यैक्येन लभ्यते।।
अन्यत्सर्वजगद्रूपं कर्मभोगपराक्रमम्।।२४।।

कर्मभिर्लभ्यते तच्च तत्यागेनापि लभ्यते।।
दुस्तरस्तु तयोस्त्यागः सकलैरपि तापस।।२५।।

अनपायं च सुगमं सदसत्कर्मगोचरम्।।२६।।

आत्मस्थेन गुणेनैव सता चाप्यसतापि वा।।
आत्मैक्येनैव यज्ज्ञानं सर्वसिद्धिप्रदायकम्।।२७।।

वर्णत्रयविहीनानां पापिष्ठानां नृणामपि।।
यद्रूपध्यानमात्रेण दुष्कृतं सुकृतायते।।२८।।

येऽर्चयंति परां शक्तिं विधिनाऽविधिनापि वा।।
न ते संसारिणो नूनं मुक्ता एव न संशयः।।२९।।

शिवो वा यां समाराध्य ध्यानयोगबलेन च।।
ईश्वरः सर्वसिद्धानामर्द्धनारीश्वरोऽभवत्।।३०।।

अन्येऽब्जप्रमुखा देवाः सिद्धास्तद्ध्यानवैभवात्।।
तस्मादशेषलोकानां त्रिपुराराधनं विना।।३१।।

न स्तो भोगापवर्गौ तु यौगपेन कुत्रचित्।।
तन्मनास्तद्रतप्राणस्ताजी तद्रतेहकः।।३२।।

तादात्म्येनैव कर्माणि कुर्वन्मुक्तिमवाप्स्यसि।।
एतद्रहस्यमाख्यातं सर्वेषां हितकाम्यया।।३३।।

सन्तुष्टेनैव तपसा भवतो मुनिसत्तम।।
देवाश्च मुनयः सिद्धा मानुषाश्च तथापरे।।
त्वन्मुखांभोजतोऽवाप्यसिद्धिं यांतु परात्पराम्।।३४।।

इति तस्य वचः श्रुत्वा हयग्रीवस्य शार्ङ्गिणः।।
प्रणिपत्य पुनर्वाक्यमुवाच मधुसूदनम्।।३५।।

भगवन्कीदृशं रूपं भवता यत्पुरोदितम्।।
किंविहारं किंप्रभावमेतन्मे वक्तुमर्हसि।।३६।।

हयग्रीव उवाच।।

एषोंऽशभूतो देवर्षे हयग्रीवो ममापरः।।
श्रोतुमिच्छसि यद्यत्वं तत्सर्वं वक्तुमर्हति।।३७।।

इत्यादिश्य जगन्नाथो हयग्रीवं तपोधनम्।।
पुरतः कुम्भजातस्य पुनरंतरधाद्धरिः।।३८।।

ततस्तु विस्मयाविष्टो हृष्टरोमा तपोधनः।।
हयग्रीर्वेण मुनिना स्वाश्रमं प्रत्यपद्यत।।३९।।

DESCRIPTION OF CHINTAMAṆI GṚHA THE RESI-DENCE OF PARĀ-SAKTI

(deities of Śrī-chakra in the enclosure)

हयग्रीव उवाच।।

चिन्तामणिगृहस्याग्निदिग्भागे कुन्दमानकम्।।
योजनायामविस्तारं योजनोच्छासचातकम्।।१।।

तत्र ज्वलति चिद्वह्निः सुधाधाराशतार्चितः।।
परमैश्वर्यजनकः पावनो ललिताज्ञया।।२।।

अनिन्धनो महाज्वालः सुधया तर्पिताकृतिः।।
कंकोलीपल्लवच्छायस्तत्र ज्वलति चिच्छिखी।।३।।

तत्र होत्री महादेवी होता कामेश्वरः परः।।
उभौ तौ नित्यहोतारौ रक्षतः सकलं जगत्।।४।।

अनुत्तरपराधीना ललिता संप्रवर्तितां।
ललिताचोदितः कामः शंकरेण प्रवर्तितः।।५।।

चिन्तामणिगृहेन्द्रस्य रक्षोभागेम्बुजाटवौ।।६।।

चक्रराजरथश्रेष्ठस्तिष्ठत्युन्नतविग्रहः।।
नवभिः पर्वभिर्युक्तः सर्वरत्नमयाकृतिः।।७।।

चतुर्योजनविस्तारो दशयोजनमुन्नतः।।
यथोत्तरं ह्रासयुक्तः स्थूलतः कूबरोज्ज्वलः।।८।।

चतुर्वेदमहाचक्रः पुरुषार्थमहाहयः।।
तत्वैरुपचरद्भिश्च चामरैरभिमंडितः।।९।।

पूर्वेक्तलक्षणैर्युक्ता मुक्ताच्छत्रेण शोभितः।।
भंडासुरमहायुद्धे कृतसाहसिकक्रियः।।१०।।

वर्तते रथमूर्धन्यः श्रीदेव्यासनपाटितः।।
चिन्तामणिगृहेन्द्रस्य वायुभागेम्बुजाटवौ।।११।।

गेयचक्ररथेन्द्रस्तु मन्त्रिण्याः प्रान्त तिष्ठति।।
चिंतामणिगृहेन्द्रस्य रुद्रभागेम्बुजाटवौ।।१२।।

वल्लभो दण्डनाथायाः किरिचक्रे महारथः।।
एतद्रथत्रयं सर्वक्षेत्रश्रीपुरपंक्तिषु।।
समानमेव विज्ञेयमङ्गस्था देवता यथा।।१३।।

आनलं कुंडमाग्नेये यस्तिष्ठति सदा ज्वलत्।।
तप्तमेतत्तु गायत्री तप्तं स्यादभयङ्करम्।।१४।।

घृणिसूर्यस्तु तत्पश्चादोंकारस्य च मन्दिरम्।।
देवी तुरीयगायत्री चक्षुष्मत्यपि तापस।।१५।।

अथ गन्धर्वराजश्च परिषद्रुद्र एव च।।
तारांबिका भगवती तत्पश्चाद्भागत: स्थिता:।।१६।।

चिंतामणिगृहेन्द्रस्य रक्षोभागं समाश्रित:।।
नामत्रय महामन्त्रवाच्योऽस्ति भगवान्हरि:।।१७।।

महागणपतिस्तस्योत्तरसंश्रितकेतन:।।
पञ्चाक्षरीमन्त्रवाच्यस्तस्य चाप्युत्तरे शिव:।।१८।।

अथ मृत्युञ्जयेशश्च वाच्यस्त्र्यक्षरमात्रत:।।
सरस्वती धारणाख्या ह्यस्य चोत्तरवासिनी।।१९।।

अकारादिक्षकारान्तवर्णमूर्तेस्तु मंदिरम्।।
मातृकाया उत्तरतस्तस्यां विन्ध्यनिषूदन।।२०।।

उत्तरे सम्पदेशी वै कालसंकर्षणी तथा।।
श्रीमहाशम्भुनाथा च देव्याविर्भावकारणम्।।२१।।

श्री: परांबा च विशदज्योत्स्ना निर्मलबिग्रहा।।
उत्तरोत्तरमेतास्तु देवाता: कृतमंदिरा:।।२२।।

बाला चैवान्नपूर्णा च हयारूढा तथैव च।।
श्रीपादुकाचतस्त्रस्तदूत्तरोत्तरमंदिरा:।।२३।।

चिन्तामणिगृहेन्द्रस्य वायव्यवसुधादित:।।
महापद्माटवपौ त्वन्या देवता: कृतमंदिरा:।।२४।।

उन्मत्तभैरवी चैव स्वप्नवाराहिका परा।।
तिरस्करणिकांबा च तथान्या पञ्चमी परा।।२५।।

यथापूर्वे कृतगृहा एता देव्यो महोदया:।।
श्रीपूर्तिश्च महादेवी श्रीमहापादुकापि च।।२६।।

यथापूर्वे कृतगृहे द्वे एते देवतोत्तमे।।
शंकरेण षडाम्नायसागरे प्रतिपादिता:।।
या विद्यास्ता: समस्ताश्च महापद्माटवीस्थले।।२७।।

इत्थं श्रीरश्मिमालायामणिक्लृप्ता ग्रहागृहा:।।
उच्चध्वजा उच्चशालास्ससोपानास्तपोधन।।२८।।

चिन्तामणिगृहेन्द्रस्य पूर्वद्वारे समुद्रप।।
दक्षिणे पार्श्वभागे तु मंत्रिनाथागृहं महत्।।२९।।

वामभागे दण्डनाथाभवनं रत्ननिर्मितम्।।
ब्रह्मविष्णुमहेशानामास्थानस्य पूर्वत:।।३०।।

भवनं दीपिताशेषदिक्चक्रं रत्नरश्मिभि:।।
समस्ता देवता एता ललिताभक्तिनिर्भरा:।।
ललितामन्त्रजाप्याश्च श्रीदेवीं समुपासते।।३१।।

पूर्वोक्तर्मस्थानं च पूर्वोक्तं र्चाकल्पनम्।।
याम्यद्वारप्रभृतिषु सर्वेष्वपि समं स्मृतम्।।३२।।

अथ चिन्तामणिगृहं वक्ष्ये श्रृणु महामुने।।
तच्छ्रीपट्टनमध्यस्थं योजनद्वयविस्तृतम्।।३३।।

तस्य चिन्तामणिमयी भित्ति: कोशसुविस्तृता।।
चिन्तामणिशिलाभिश्च च्छादिनीभिस्तथोपरि।।३४।।

संवृता कूटरूपेण तत्रतत्र समुन्नता।।
गृहभित्तिस्तथोन्नम्रा चतुर्योजनमानत:।।३५।।

विंशतिर्योजनं तस्याश्चोन्नम्रा भूमिरुच्यते।।
ततोर्ध्व ह्राससंयुक्तं स्थौल्यत्रिमुकुटोज्ज्वला।।३६।।

तानि चेच्छाक्रियाज्ञानरूपाणि मुकुटान्यपि।।
सदा देदीप्यमानानि चिन्तामणिमयान्यपि।।३७।।

चिन्तामणिगृहे सर्वं चिन्तामणिमयं स्मृतम्।।
यस्य द्वाराणि चत्वारि क्रोशार्धायामभाञ्जि च।।३८।।

क्रोशार्द्धार्द्धं च विस्तारो द्वाराणां कथितो मुने।।
द्वारेषु सर्वेषु पुनश्चिन्तामणिगृहान्तरे।।३९।।

पिहिता ललिता देव्या मूर्तिर्लोहितसिन्धुवत्।।
तरुणार्कसहस्राभा चन्द्रवच्छीतला ह्यपि।।
द्वारेषु सर्वेषु पुनश्चिन्त्रामणिगृहान्तरे।।
मुहुः प्रवाहरूपेण प्रसरन्तील महामुने।।४०।।

पूर्वाम्नायमयं चैव पूर्वद्वारं प्रकीर्तितम्।।
दक्षिणद्वारदेशस्तु दक्षिणाम्नायलक्षण:।।४१।।

पश्चिमद्वारदेशस्तु पश्चिमाम्नायलक्षण:।।
उत्तरद्वारदेश: स्यादुत्तराम्नायलक्षण:।।४२।।

गृहराजस्यान्तराले भित्तौ ख़चितदण्डका:।।
रत्नप्रदीपा भास्वंत: कोट्यर्कसदृशत्विष:।।
परितस्तत्र वर्तंते भासयंतो गृहांतरम्।।४३।।

चिंतामणिगृहस्यास्य मध्यस्थाने महीयसि।।
अत्युच्चैर्वेदिकाभागे बिन्दुचक्रं महत्तरम्।।४४।।

चिन्तारत्नगृहोत्तुंगभित्रेर्बिदोश्चमध्यभू:।।
भित्ति: कोशं परित्यज्य कोशत्रयमुदाहृतम्।।४५।।

तत्र क्रोशत्रयस्थाने ह्यणिमाद्यात्मरोचिषा।।
क्रोशत्रयं समस्तं तद्धस्तसंख्याप्रकारत:।।
चतुर्विंशतिसाहस्रहस्तै: संमितमुच्यते।।४६।।

बिन्दुपीठेशपर्यन्तं चतुर्दशविभेदतः।।
अन्तरे भेदिते जाते हस्तसंख्या मयोच्यते।।४७।।

पद्माटवीस्थलाच्चिन्तामणिवेश्मान्तरं मुने।।
हस्तविंशतिरुन्नमं तत्र स्युरणिमादयः।।४८।।

अणिमान्तरविस्तारश्चतुर्नल्वसमन्वितः।।
किष्कुश्चतुःशती नल्वकिष्कुर्हस्त उदीर्यते।।४९।।

तत्रांतरेऽणिमाद्यास्तु पूर्वादिकृतमंदिराः।।
अणिमा महिमा चैव लघिमा गरिमा तथा।।५०।।

ईशित्वं च वशित्वं च प्राकाम्यं मुक्तिरेव च।।
इच्छा प्राप्तिः सर्वकामेत्येताः सिद्धय उत्तमाः।।५१।।

रससिद्धिर्मोक्षसिद्धिर्बलसिद्धिस्तथैव च।।
खड्गसिद्धिः पादुकाया सिद्धिरञ्जनसिद्धिकः।।५२।।

वाक्सिद्धिर्लोकसिद्धिश्च देहसिद्धिरनन्तरम्।।
एता अष्टौ सिद्धयस्तु बह्व्योऽन्य योगिसंमताः।।५३।।

तत्रांतरे तु परितः सेवते परमेश्वरीम्।।
कोटिशः सिद्धयस्तस्मिन्नणिमाद्यन्तरे मुने।।५४।।

नवलावण्यसंपूर्णाः स्मयमानमुखांबुजाः।।
ज्वलच्चिन्तामणिकराः सदा षोडशवार्षिकाः।।
अत्युदारप्रकृतयः खेलंति मदविह्वलाः।।५५।।

तस्याणिमाद्यन्तरस्योपरिष्टात्सुमनोहरम्।।
हस्तविंशतीरुन्नमं चतुर्नल्वप्रविस्तरम्।।५६।।

चतुर्दिक्षु च सोपानपंक्तिभिः सुमनोहरम्।।
ब्रह्माद्यंबरधिष्ण्यं स्यात्तत्रदेवीः स्थिताः श्रृणु।।५७।।

ब्राह्मी माहेश्वरी चैव कौमारी वैष्णवी तथा।।
वाराही चैव माहेन्द्री चामुण्डाप्यथ सप्तमी।।
महालक्ष्मीरष्टमी तु तत्रैताः कृतमंदिराः।।५८।।

नानाविधायुधाढ्याश्च नानाशक्तिपरिच्छदाः।।
पूर्वादिदिशमारभ्य प्रादक्षिण्यकृतालयाः।।५९।।

अथ बाह्यंतरा तस्योपरिष्टात्कुम्भसंभव।।
हस्तविंशतिरुन्नम्रं चतुर्नल्वप्रविस्तरम्।।
मुद्रान्तरमिति त्रैधं तत्र मुद्राः कृतालयाः।।६०।।

सक्षोभद्रावणाकर्षवशेन्मादमहाङ्कुशाः।।
खेचरी बीबजयोन्याख्य त्रिखण्डा दशमी पुनः।।६१।।

पूर्वादिशिमारभ्य मद्रा एताः प्रतिष्ठिताः।।
अत्यन्तपसुन्दराकारा नवयौवनविह्वलाः।।६२।।

कांतिभिः कमनीयाभिः पूरयंत्यो गृहांतरम्।।
सेवंते मुनिशार्दूल ललितापरमेश्वरीम्।।६३।।

अन्तरं त्रयमेतत्तु चक्रं त्रैलोकयमोहनम्।।
एतस्मिञ्छक्तयो यासु ता उक्ताः प्रकटाभिधाः।।६४।।

एतासां समधिष्ठात्री त्रिपुरा चक्रनायिका।।
तच्चक्रपालनकरी मुद्रासंक्षोभणात्मिका।।६५।।

अथ मुद्रांतरस्योर्ध्व प्रोक्ता नित्याकलांतरम्।।
हस्तविंशतिरुन्नम्रं चतुर्नल्वप्राविस्तरम्।।
पर्वतश्चैव सोपानमुत्तरोत्तरमिष्यते।।६६।।

नित्याकलांतरे तस्मिन्कामाकर्षणिका मुखाः।।
परितः कृतसंस्थानाः षोडर्शेदुकलात्मिकाः।।६७।।

तर्पयंत्यो दिशां चक्रं सुधास्यंदौ सुशीतलैः।।
तासां नामानि मत्तस्त्वमवधारय कुम्भज।।६८।।

कामाकर्षिणिका नित्या बुद्ध्याकर्षणिकापरा।।
रसाकर्षणिका नित्या गन्धाकर्षणिका कला।।६९।।

चित्ताकर्षणिका नित्या धैर्याकर्षणिका कला।।
स्मृत्याकर्षणिका नित्या नामाकर्षणिका कला।।७०।।

बीजाकर्षणिका नित्या चार्थाकर्षणिका कला।।
अमृताकर्षणी चान्या शरीराकर्षणी कला।।७१।।

एतास्तु गुप्तयोगिन्यस्त्रिपुरेशी तु चक्रिणी।।
सर्वाशापूरिकाभिख्या चक्राधिष्ठानदेवता।।७२।।

एतच्चक्रे पालिका तु मुद्रा द्राविणिकाभिधा।।
नित्या कलांतरादूर्ध्वं धिष्ण्यमत्यंतसुन्दरम्।।७३।।

हस्तविंशतिरुन्नम्रं चतुर्नल्वप्रविस्तरम्।।
प्राग्वत्सोपानसंयुक्तं सर्वसंक्षोभणाभिधम्।।७४।।

तत्राष्टौ शक्तयस्तीव्रा मदारुणविलोचनाः।।
नवतारुण्यमत्ताश्च सेवंते परमेश्वरीम्।।७५।।

कुसुमा मेखला चैव मदना मदनातुरा।।
रेखा वेगिन्यंकुशा च मालिन्यष्टौ च शक्तयः।।७६।।

कोटिशस्तत्परीवारः शक्तयोऽनंगपूर्विकाः।।
सर्वसंक्षोभमिदं चक्रं तदधिदेवता।।७७।।

सुंदरी नाम विज्ञेया नाम्ना गुप्ततरापि सा।।
तच्चक्रपालनकरी मुद्राकर्षणिका स्मृता।।७८।।

अनंगशक्त्यंतरस्योपरिष्टात्कुंभसंभव।।
हस्तविंशतिरुन्नम्रं चतुर्नल्वप्रविस्तरम्।।
संक्षोभिण्याद्यंतरं स्यात्सर्वसौभाग्यदायकम्।।७९।।

सर्वसंक्षोभिणीमुख्यास्तत्र शक्तय उद्धता:।।
चतुर्दश वसंत्येव तासां नामानि मच्छृणु।।८०।।

सर्वसंक्षोभिणी शक्ति: सर्वविद्राविणी तथा।।
सर्वाकर्षणिका शक्ति: सर्वाह्लादनिका तथा।।८१।।

सर्वसंमोहिनी शक्ति: सर्वस्तंभनशक्तिका।।
सर्वजृंभिणिका शक्तिस्तथा सर्ववशंकरी।।८२।।

सर्वरंजनशक्तिश्च सर्वोन्मादनिशक्तिका।।
सर्वार्थसाधिका शक्ति: सर्वसंपत्तिपूरिणी।।८३।।

सर्वमंत्रमयी शक्ति: सर्वद्वंद्वक्षयंकरी।।
एताश्च संप्रदायाख्याश्चक्रिणीपुरवसिनी:।।८४।।

मुद्राश्च सर्ववश्याख्यास्तच्चक्रे रक्षिका मता:।।
कोटिश: शक्तयस्तत्र तासां किंकर्य्य उद्धता:।।८५।।

संक्षोभिण्याद्यंतरस्योपरिष्टात्कुंभसंभव।।
हस्तविंशतिरुन्नम्रं चतुर्नल्वप्रविस्तरम्।।
सर्वसिद्धादिकानां तु मंदिरं विष्ट्यमुच्यते।।८६।।

सर्वसिद्धिप्रदा चैव सर्वसंपत्प्रदा तथा।।
सर्वप्रियंकरी देवी सर्वमङ्गलकारिणी।।८७।।

सर्वकामप्रदा देवी सर्वदु:खविमोचनी।।
सर्वमृत्युप्रशमनी सर्वविघ्ननिवारिणी।।८८।।

सर्वागसुन्दरी देवी सर्वसौभाग्यदायिनी।।
एता देव्य: कलोत्कीर्णा योगिन्यो नामत: स्मृता:।।८९।।

चक्रिणी श्रीश्च विज्ञेया चक्रं सर्वार्थसाधकम्।।
सर्वोन्मादनमुद्राश्च चक्रस्य परिपालिका:।।९०।।

सर्वासिद्ध्यान्तरस्योपरिष्टात्कुम्भसम्भव।।
हस्तविंशतिरुन्नम्रं चतुर्नल्वप्रविस्तरम्।।९१।।

सर्वज्ञाद्यंतरं नाम्ना सर्वरक्षाकर स्मृतम्।।
चक्रं महत्तरं दिव्यं सर्वज्ञाद्याः प्रकीर्तिताः।।९२।।

सर्वज्ञा सर्वशक्तिश्च सर्वैश्वर्यप्रदायिनी।।
सर्वज्ञानमयी देवी सर्वव्याधिविनाशिनी।।९३।।

सर्वाधारस्वपरूपा च सर्वपापहरी तथा।।
सर्वानन्दमयी देवी सर्वरक्षास्वरूपिणी।।९४।।

सर्वेप्सितप्रदा चैता निर्गर्वा योगिनीश्वराः।।१४।।

मलिनी चक्रिणी प्रोक्ता मुद्रा सर्वमहांकुशा।
इति चिन्तामणिगृहे सर्वज्ञाद्यन्तरावधि।।
चक्राणि कानिचित्प्रोक्तान्यन्यान्यपि मुने श्रुणु।।९६।।

(DESCRIPTION OF INNER APARTMENT OF THE GODDESS)

हयग्रीव उवाच।।

सर्वज्ञाद्यंतरालस्योपरिष्टात्कलशोद्भव।।
हस्तविंशतिरुन्नम्रं चतुर्नल्वप्रविस्तरम्।।१।।

वशिन्याद्यन्तरं प्राग्वत्सोपानमंदिरम्।।
सर्वरोग हरं नाम्नां तच्चक्रमिति विश्रुतम्।।२।।

वशिन्याास्तत्र देव्यः पूर्वादिदिगनुक्रमात्।।
स्वरैस्तु रहितास्तत्र प्रथमा वशिनीश्वरी।।३।।

कवर्गसहिता पश्चात्कामेश्वर्याख्यवाङ्मयी।।
चवर्गजुष्टा वागीशी मोदिनी स्यात्तृतीयका।।४।।

टवर्गमंडिताकारा विमलाख्य सरस्वती।।
तवर्गेण तथोपेता पञ्चमी वाक्प्रधारण।।५।।

पवर्गेण परिस्फीता षष्ठी तु जयिनी मता।।
यादिवर्णचतुष्कोणे सर्वैश्वर्यादिवाङ्मयी।।६।।

साधिकाक्षरषट्केन कौलिनी त्वष्टमी मता।।
एता देव्यो जपरता मुक्ताभरणमंडिता:।।७।।

सदा स्फुरद्गद्यपद्यलहरीललिता मता:।।
काव्यैश्च नाटकैश्चैव मधुरै: कर्णहारिभि:।।
विनोदयन्त्य: श्रीदेवीं वर्तंते कुम्भसम्भव।।८।।

एता रहस्यनाम्नैव ख्याता वातापितापन।।
नयिका स्वस्य चक्रस्य सिद्धानाम्ना प्रकीर्तिता।।९।।

अस्य चक्रस्य संरक्षाकारिणी खेचरी मता।।
वशिन्याद्यंतरालस्योपरिष्टाद्विंध्यमर्दन।।१०।।

हस्तविंशतिरुन्नम्रं चतुर्नल्वप्रविस्तरम्।।
अस्त्रं चक्रमितिज्ञेयं तत्र बाणादिदेवता:।।११।।

पञ्च बाणेश्वरीदेव्य: पञ्च कामेश्वराशुगा:।।
अंकुशद्वितयं, दीप्तमादिस्त्रीपुंसयोर्द्वयो:।।१२।।

धनुर्द्वयं च विंध्यारे नव पुंड्रेषु कल्पितम्।।
पाशद्वयं च दीप्ताभं चत्वार्यस्त्राणि कुम्भज।।१३।।

कामेश्वर्यास्तु चत्वारि चत्वारि श्रीमहेशितु:।।
आहत्याष्टायुधानीति प्रज्वलन्ति विभांति च।।१४।।

भण्डासुरमहायुद्धे दुष्टदानवशोणितै:।।
पीतैरतीव तृप्तानि दिव्यास्त्राण्यतिजाग्रति।।९५।।

एतेषामायुधानां तु परिवारायुधान्यलम्।।
वर्तंतेऽस्त्रांतरे तत्र तेषां संख्या तु कोटिशः।।१६।।

वज्रशक्तिः शतघ्नी च भुशुण्डी मुसलं तथा।।
कृपाणः पट्टिशं चैव मुद्गरंभिन्दिपालकम्।।१७।।

एवमादीनि शस्त्राणि सहस्त्राणां सहस्त्रशः।।
अष्टायुधमहाशक्तीः सेवंते मदविह्वलाः।।९८।।

अथ शस्त्रांतरालस्योपरि वातापितापन।।
हस्तविंशतिरुन्नमं चतुनल्वप्रविस्तरम्।।
धिष्ण्यं तु समयेशीनां स्थानं च तिसृणां मतम्।।१९।।

कामेशाद्यास्तत्र देव्यस्तिस्त्रोऽन्या तु चतुर्थिका।।
सैव निःशेषविश्वानां सवित्री ललितेश्वरी।।२०।।

तिसृणां श्रुणु नामानि कामेशी प्रथमा मता।।
वज्रेशी भगमाला च ताः सेवन्ते सहस्त्रशः।।२१।।

सर्वेषां दर्शनानां च या देव्यो विविधाः स्मृताः।।
ताः सर्वास्तत्र कामेशादिमहोदयाः।।२२।।

एतासां च प्रसंगेषु नित्यानां च प्रसज्ञने।।
चक्रिणीनां योगिनीनां श्रीदेवी पूरणात्मिका।।२३।।

या कामेश्वरदेवांकशायिनी ललितांबिका।।
कामेश्यादिचतुर्थी सा नित्यानां षोडशी मता।।२४।।

योगिनी चक्रदेवीनां नवमी परिकीर्तिता।।
समयेश्यन्तरालस्योपरिष्टादिल्वलांतक।।२५।।

नाथांतरमिति प्रोक्तं हस्तविंशतिरुन्नतम्।।
चतुर्नल्वप्रविस्तारं प्राग्वत्सोपानमण्डितम्।।२६।।

तत्र नाथामहादेव्या योगशास्त्रप्रवर्त्तकाः।।
सर्वेषां मन्त्रगुरवः सर्वविद्यामहार्णवाः।।२७।।

चत्वारो योगनाथाश्च लोकानामिहगुप्तये।।
सृष्टाः कार्मेशदेवेन तेषां नामानि मे श्रृणु।।२८।।

मित्री च शोडिशश्चैव चर्याख्यः कुम्भसम्भव।।
तैः सृष्टा बहवो लोका रक्षार्थं पादुकात्मकाः।।२९।।

दिव्यविद्या मानवौघसिद्धौघाः सुरतापसाः।।
प्राप्तसालोक्यसारूप्यसायुज्यादिकसिद्धयः।।३०।।

महान्तो गुरवस्तांस्तु सेवन्ते प्रचुरां गुरून्।।
अथा नाथांतरालस्योपरिष्टाद्धिष्ण्यमुत्तमम्।।३१।।

हस्तविंशतिरुन्नम्रं चतुर्नल्वप्रविस्तरम्।।
नित्यान्तरमिति प्रोक्तं नित्याः पंचदशात्र वै।।३२।।

अथ कामेश्वरी नित्या गित्या च भगमालिनी।।
नित्यक्लिन्ना अपि तथा भेरुण्डा वह्निवासिनी।।३३।।

महावज्रेश्वरी दूती त्वरिता कुलसुन्दरी।।
नित्या नीलपताका च विजया सर्वमङ्गला।।३४।।

ज्वालामालिनिका चित्रेत्येताः पंचदशोदिताः।।
एता देवीस्वरूपाः स्युर्महाबलपराक्रमाः।।३५।।

प्रथमा मुख्यतिथितां प्राप्ता व्याप्य जगत्त्रयाः।।
कालत्रितयरूपाश्च कालग्रासविचक्षणाः।।३६।।

ब्रह्मादीनामशेषाणां चिरकालमुपेयुषाम्।।
तत्तत्काल शतायुष्यरूपा देव्याज्ञया स्थिताः।।३७।।

नित्योद्यता निरातंकाः श्रीपराङ्गसमुद्भवाः।।
सेवन्ते जगतामृद्ध्यै ललिता चित्स्वरूपिणीम्।।३८।।

तासां भवनतां प्राप्ता दीप्त: पंचदशेश्वरा:।।
विसृष्टिबिन्दुचक्रे तु षोडश्या भवनं मतम्।।३९।।

अथ नित्यांतरालस्योपरिष्टात्कुम्भसम्भव।।
अङ्गदेव्यंतरं प्रोक्तं हस्तविंशतिरुन्नतम्।।४०।।

चतुर्नल्वप्रविस्तारं प्राग्वत्सोपानमंदिरम्।।
तस्मिन्हृदयदेव्याद्या: शक्तय: संति वै मुने।।४१।।

हृद्देवी च शिरोदेवी शिखादेवी तथैव च।।
वर्मदवी दृष्टिदेवी शस्त्रदेवी षडीरिता:।।४२।।

अत्यंतसन्निकृष्टास्ता: श्रीकामेश्वरसुभ्रुव:।।
नवलावण्यपूर्णाग्य: सावधाना धृतायुधा:।।४३।।

परितो बिन्दुपीठे चभ्राम्यनतो दृप्तमूर्तय:।।
ललिताज्ञाप्रवर्तिन्यो वशीनां पीठवर्तिका:।।४४।।

अथांगदेव्यन्तरस्योपरिष्टान्मण्डलाकृति।।
बिन्दुनाद महापीठं दशहस्तसमुन्नतम्।।४५।।

नल्वाष्टकप्रविस्तारमुद्यदादित्यसंनिभम्।।
बिन्दुपीठमिदं ज्ञेयं श्रीपीठमपि चेष्यते।।४६।।

महापीठमिति ज्ञेयं विद्यापीठमपीष्यते।।
आनन्दपीठमपि च पंचाशत्पीठरूपधृक्।।४७।।

तत्र श्रीललितादेव्या: पंचब्रह्ममये महत्।।
जागर्ति मञ्चरत्नं तु प्रपंचत्रयमूलकम्।।४८।।

तस्य मञ्चस्य पादास्तु चत्वार:परिकीर्तिता:।।
दशहस्तसमुन्नम्रा हस्तत्रितयविष्टिता:।।४९।।

ब्रह्मविष्णुमहेशानेश्वररूपत्वमागता:।।
शक्तिभावमनुप्राप्ता: सदा श्रीध्यानयोगभ:।।५०।।

एकस्तु पंचपादः स्याज्जपाकुसुमन्निमः।।
ब्रह्मात्मकः स विज्ञेयो वह्निदिग्भागमाश्रितः।।५१।।

चतुर्थो मंचपादस्तु कर्णिकारकसाररुक्।।
ईश्वरात्मा स विज्ञेय ईशदिग्भागमाश्रितः।।५२।।

एते सर्वे सायुधाश्च सर्वालंकारभूषिताः।।
उपर्यधः स्तंभरूपा मध्ये पुरुषरूपिणः।।५३।।

श्रीध्यानमीलिताक्षाश्च श्रीध्यानान्निश्चलांगकाः।।
तेषामुपरि मंचस्य फलकन्तु सदशिवः।।५४।।

विकासिदाडिमच्छायश्चतुर्नल्वप्रविस्तरः।।
नल्वषट्कायामवांश्च सदा भास्वरमूर्तिमान्।।५५।।

अंगदेव्यंतरारंभान्मंचस्य फलकावधि।।
चिंतामणिमयांगानि तत्वरूपाणि तापस।।५६।।

सोपानानि विभासंते षट्त्रिंशद्वै निवेशनैः।।
आरोहस्य क्रमेणैव सोपानान्यभिदध्महे।।५७।।

भूमिरापोऽनलो वायुराकाशो गन्ध एव च।।
रसो रूपं स्पर्शशब्दोपस्थपायुपदानि च।।५८।।

पाणिवाग्घ्राणजिह्वाश्चत्वक् चक्षुः श्रोत्रमेव च।।
अहंकारश्च बुद्धिश्च मनः प्रकृतिपूरुषौ।।५९।।

नियतिः कालरागौ च कला विद्ये? च मायया।।
शुद्धविद्येश्वरसदाशिवशक्तिः शिवा इति।।६०।।

एताः षट्त्रिंशदाख्यातास्तत्वसोपानपंक्तयः।।
पूषा सोपानपंक्तिश्च मञ्चपूर्वदिशं श्रिताः।।६१।।

अथ मञ्चस्योपरिष्टाद्धंसतूलिकतल्पकः।।
हस्तमात्रं समुन्नम्रं चतुर्नल्वप्रविस्तरम्।।६२।।

पादोपधानमूर्धोपधानद्वंद्वविराजितम्।।
गडुकानां चतु:षष्टिशोभितं पाटलत्विषा।।६३।।

तस्योपरिष्टात्कौसुंभत्सनेनोत्तरच्छद:।।
शुचिना मृदुना क्लृप्तपद्मरागमणित्विषा।।६४।।

तस्योपरि वसन्पूर्वदिङ्भुखो दययान्वित:।।
श्रंगारवेषरुचिरस्सदा षोडशवर्षिक:।।६५।।

उद्यद्भास्करबिंबाभश्चतुर्हस्तस्त्रिलोचन:।।
हारकेयूरमुकुटकटकाद्यैरलंकृत:।।६६।।

क्रमनीयस्मितज्योत्स्नापरिपूर्णकपोलभू:।।
जागर्ति भगवानादिदेव: कामेश्वर: शिव:।।६७।।

तस्योत्संगे समासीना तरुणादित्यपाटला।।
सदा षड्षोडशवर्षा च नवयौवनदर्पिता।।६८।।

अमृष्टपद्मरागाभा चन्दाब्जनखच्छटा।।
यावकश्रीर्निर्व्यपेक्षा पादलौहित्यवाहिनी।।६९।।

कलनिस्वानमञ्जीरपतत्कंकणमोहना।।
अनङ्गवरतूणीरदर्पोन्मथनजंघिगका।।७०।।

करिशुण्डदो:कदलिकाकांतितुल्योरुशोभिनी।।
अरुणेन दुकूलेन सुस्पर्शेन तनीयसा।।
अलंकृतनितंबाढ्याा जघनाभोगभासुरा।।७१।।

अर्धोरुकग्रंथिमती रत्नकांचीविराजिता।।
नतनाभिमहावर्तत्रिवल्यूर्मिप्रभासरित्।।७२।।

स्तनकुड्भलहिंदोलमुक्तादामशतावृता।।
अतिपीवरवक्षोजभारभंगुरमध्यभू:।।७३।।

शिरीषदाममृदुलच्छदाभांश्चतुरो भुजान्।।७४।।

केयूरकंकणश्रेणीमंडितान्सोर्मिकाङ्गुलीन्।।
वहंती पतिसंसृष्टशंखसुन्दरकंधरा।।७५।।

मुखदर्पणवृत्ताभचिबुका पाटलाधरा।।
शुचिभिः पंक्तिशुद्धैश्च विद्यारूपैर्विभास्वरैः।।
कुन्दकुड्भललक्ष्मीकैर्दंतैर्दर्शितचन्द्रिका।।७६।।

स्थूलमौक्तिकसनद्धनानाभरणभासुरा।।
केतकांतर्दलश्रोणी दीर्घदीर्घविलोचना।।७७।।

अर्धेन्दुललिते भाले सम्यक्ल्प्तालकच्छटा।।
पालीवतं समाणिक्यकुण्डलामंडितश्रुतिः।।७८।।

नवकर्पूरकस्तूरीसदामोदितवीटिका।।
शरच्चश्चन्निशानाथमण्डलीमधुरानना।।७९।।

चिन्तामणीनां सारेण क्लृचारुकिरीटिका।।
स्फुरत्तिलकरत्नाभभालनेत्रविराजिता।।८०।।

गाढांधकारनिबिडक्षामकुन्तलसंहतिः।।
सीमन्तरेखाविन्यस्तसिंदूरश्रेणिभासुरा।।८१।।

स्फुरच्चंद्रकलोत्तंसमदलोलविलोचना।।
सर्वश्रृङ्गारवेषाढ्या सर्वाभरणभूषिता।।८२।।

समस्तलोकमाता च सदानन्दविवर्धिनी।।
ब्रह्मविष्णुगिरीशेशसदाशिवनिदानभूः।।८३।।

अपांगरिंखत्करुणान्झिरीतर्पिता खिला।।
भासते सा भगवती पापघ्नी ललितांबिका।।८४।।

अन्यदैवतपूजानां यस्याः पूजाफलं विदुः।।
यस्यः पूजाफलं प्राहु र्यस्या एव हि पूजनम्।।८५।।

तस्याश्च ललितादेव्या वर्णयामि कथं पुनः।।
वर्षकोटिसहस्रेणाप्येकांशो वर्ण्यते न हि।।८६।।

वर्ण्यमाना ह्यवग्रूपा वाचस्तस्यां कुतो गतिः।।
यतो वाचो निवर्तंते अप्राप्य मनसा सह।।८७।।

बहुना किमिहोक्तेन तत्वभूतमिदं श्रुणु।।
न पक्षपातान्न स्नेहान्न मोहाद्वा मयोच्यते।।८८।।

संतु कल्पतरोः शाखा लेखिन्यस्तपसां निधे।।
मषीपात्राणि सर्वेऽपि सप्त संतु महार्णवाः।।८९।।

पञ्चाशत्कोटिविस्तीर्णा भूमिः पत्रत्वमृच्छतु।।
तस्य लेखनकालोऽस्तु पराध्यर्धिकवत्सैरः।।९०।।

लिखंतु सर्वे लोकाश्च प्रत्येकं कोटिबाहवः।।
सर्वे बृहस्पतिसमा वक्तरो यदि कुंभज।।९१।।

अथापि तस्याः श्रीदेव्याः पादाब्जैकाङ्गुलिद्युतेः।।
सहस्रांशेष्वेकैकांशवर्णना न हि जायते।।
अथ वा वृत्तिरखिला निष्फला तद्गुणस्तुतौ।।९२।।

बिन्दुपीठस्य परितश्चतुरस्रवया स्थिता।।
महामायाजवनिका लंबते मेचकप्रभा।।९३।।

देव्या उपरि हस्तानां विंश तिद्वितयोर्ध्वतः।।
इंद्रगोपवितानं तु बद्धं त्रैलोक्यदुर्लभम्।।९४।।

तत्रालंकारजालं तु वर्तमानं सुदुर्लभम्।
मद्वाणी वर्णयिष्यंती कंठ एव ह्रिया हता।।९५।।

सैव जानाति तत्सर्वं तत्रत्यमखिलं गुणम्।।
मनसोऽपि हि दूरे तत् सौभाग्यं केन वर्ण्यते।।९६।।

इत्थं भंडमहादैत्यवधाय ललितांबिका।।
प्रादुर्भूता चिदनलाद्दग्धनिःशेषदानवा।।९७।।

दिव्यशिल्पिजनैः क्लृप्तं षोडशक्षेत्रवेशनम्।।
अधिष्ठाय श्रीनगरं सदा रक्षति विष्टपम्।।९८।।

इत्थमेव प्रकारेण श्रीपुराण्यन्यकान्यपि।।
न भेदकोऽपि विन्यासो नाममात्रं पुरां भिदा।।९९।।

नानावृक्षमहोद्यानमारभ्येतिक्रमेण ये।।
वदंति श्रीपुरकथां ते यांति परमां गतिम्।।१००।।

आकर्णयंति पृच्छंति विचिन्वंति च ये नराः।।
ये पुस्तके धारयंति ते यांति परमां गतिम्।।१०१।।

ये श्रीपुरप्रकारेण तत्तत्स्थानविभेदतः।।
कृत्वा शिल्पिजनैः सर्वे श्रीदेव्यायतनं महत्।।
संपादयंति ये भक्तास्ते यांति परमां गतिम्।।१०२।।

(PARVATI'S PENANCE AND EXPIATION OF SIVA'S SIN)

अगस्त्य उवाच।।

श्रीकामकोष्टपीठस्था महात्रिपुरसुन्दरी।।
कं कं विलासमकरोत्कामाक्षीत्यभिविश्रुता।।१।।

श्रीकामाक्षीति सा देवी महात्रिपुरसुंन्दरी।।
भूमण्डलस्थिता देवी किं करोति महेश्वरी।।
एतस्याश्चरितं दिव्यं वद मे वदतां वर।।२।।

हयग्रीव उवाच।।

अत्र स्थितापि सर्वेषां हृदयस्था घटोद्भव।।
तत्तत्कर्मानुरूपं सा प्रदत्ते देहिनां फलम्।।३।।

यत्किञ्चिद्वर्तते लोके सर्वमस्या विचेष्टितम्।।
किञ्चिञ्चिन्तयते कश्चित्स्वच्छंदं विदधात्यसौ।।४।।

तस्या एवावतारास्तु त्रिपुराद्याश्च शक्तय:।।
इयमेव महालक्ष्मीः ससर्जांडत्रयं पुरा।।५।।

पुरत्रयाणामावासं शक्तीनां तिसृणामपि।।
एकस्मादंडतो जातावंबिकापुरुषोत्तमौ।।६।।

श्रीविरिञ्चौ ततोऽन्यस्मादन्यस्माच्च गिराशिवौ।।
इंदिरा योजयामास मुकुंदने महेश्वरी।।
पार्वत्या परमेशानं सरस्वत्या पितामहम्।।७।।

ब्रह्माणं सर्वलोकानां सृष्टिकार्ये न्ययुंक्त सा।।
वासुदेवं परित्राणे संहारे च त्रिलोचनम्।।८।।

ते सर्वेऽपि महालक्ष्मीं ध्यायंत: शर्मदां सदा।।
ब्रह्मलोके च बैकुंठे कैलासे च वसंत्यमी।।९।।

कदाचित्पार्वती देवी कैलासशिखरे शुभे।।
विहरंती महेशस्य पिधानं नेत्रयो र्व्यधात्।।१०।।

चंद्रसूर्यौ यतस्तस्य नेत्रात्तस्माज्जगत्त्रयम्।।
अंधकारावतमभूदतेजस्कं समंतत:।।११।।

ततश्च सकला लोकास्त्यक्तदेवपितृयिा:।।
इतिकर्त्तव्यतामूढा न प्रजानन्त किञ्चन।।१२।।

तद्दृष्ट्वा भगवान्रुद्र: पार्वतीमिदमब्रवीत्।।
त्वया पापं कृतं देवि मम नेत्रपिधानत:।।१३।।

ऋषयस्त्यक्ततपसो हतसन्ध्याश्च वैदिका:।।
सर्वं च वैदिकं कर्म त्वया नाशितमबिके।।१४।।

तस्मात्पापस्य शांत्यर्थं तपः कुरु सुदुष्करम्।।
गत्वा काशीं व्रतं तत्र किञ्चित्कालं समाचर।।१५।।

पश्चात्कांचि पुरं गत्वा कामाक्षीं तत्र द्रक्ष्यसि।।
आराधयैतां नित्यां त्वं सर्वपापहरीं शिवाम्।।१६।।

तुलसीमग्रतः कृत्वा कम्पाकूले तपः कुरु।।
इत्यादिश्य महादेवस्तत्रैवान्तरधीयता।।१७।।

तथा कृतवतीशानी भर्तुराज्ञानुवर्तिनी।।
चिरेण तपसा क्लिष्टामनन्यहृदयां शिवाम्।।१८।।

अग्रतः कृतसांनिध्या कामाक्षी वाक्यमब्रवीत्।।
वत्से तपोभिरत्युग्रैरलं प्रीतास्मि सुव्रते।।१९।।

उन्मील्यनयने पश्चात्पार्वती स्वपुरः स्थिताम्।।
बालार्कायुतसंकाशां सर्वाभरणभूषिताम्।।२०।।

किरीटहारकेयूरकटकाद्यैरलंकृताम्।।
पाशांकुशेक्षुकोदंडपञ्चबाणलसत्कराम्।।२१।।

किरीटमुकुटोल्लासिचंद्ररेखाविभूषणाम्।।
विधातृहरिरुद्रेशसदाशिवपदप्रदाम्।।२२।।

सगुणं ब्रह्मतामाउहुरनुत्तरपदाभिधाम्।।
प्रपञ्चद्वयनिर्माणकारिणीं तां परांबिकाम्।।२३।।

तां दृष्ट्वाथ महाराज्ञीं महानंदपरिप्लुता।।
पुलकांचितसर्वांगी हर्षेणोत्फुल्ललोचना।।२४।।

चंडिकामंगलाद्यैश्च सहसा स्वसखीजनैः।।
प्रणिपत्य च साष्टाङ्गं कृत्वा चैव प्रदक्षिणाम्।।२५।।

बद्धांजलिपुटा भूयः प्रणता स्वैक्यरूपिणी।।
तामाह कृपया वीक्ष्य महात्रिपुरसुंदरी।।२६।।

बाहुभ्यां संपरिष्वज्य सस्नेहमिदमब्रवीत्।।
वत्से लभस्व भर्तारं रुद्रं स्वमनसेप्सितम्।।२७।।

लोके त्वमपि रक्षार्थे ममाज्ञामनुवर्तय।।
अहं त्वमिति को भेदस्त्वमेवाहं न संशय:।।२८।।

किं पापं तव कल्याणि त्वं हि पापनिकृंतनी।।
आमनंति हि योगींद्रास्त्वामेव ब्रह्मरूपिणीम्।।२९।।

लीलामात्रमिदं वत्से परलोकविडंबनम्।।
इत्यूचिषीं महाराज्ञीमंबिकां सर्वमंगला।।
भक्त्या प्रणम्य पश्यंती परां प्रीतिमुपाययौ।।३०।।

स्तुवत्यामेव पार्वत्यां तदानीमेव सापरा।।
प्रविष्टा हृदयं तस्या: प्रहृष्टाया महामुने।।३१।।

अथ विस्मयमापन्ना चिंतयंती मुहुर्मुहु:।।
स्वप्न: किमेष दृष्टो वा मया किमथ वा भ्रम:।।३२।।

इत्थं विमृश्य परित: प्रेरयामास लोचने।।
जयां च विजयां पश्चात्सख्यावालोक्य सस्मिते।।
प्रसन्नवदना सा तु प्रणते वदति स्म सा।।३३।।

एतावंतमलं कालं कुत्र याते युवां प्रिये।।
मया दृष्टां तु कामाक्षीं युवां चेत्किमपश्यतम्।।३४।।

सख्यौ तु तद्वच: श्रुत्वा प्रहर्षोत्फुल्ललोचने।।
पुष्पाणि पूजनार्हाणि निधायाग्रे समूचतु:।।३५।।

सत्यमेवाधुना दृष्टा ह्यावाभ्यामपि सा परा।।
न स्वप्नो न भ्रमो वापि साक्षात्ते हृदयं गता।।
इत्युक्त्वा पार्श्वयोस्तस्या निषण्णे विनयानते।।३६।।

एकाम्रमूले भगवान्भवानीविरहार्तिमान्।।
गौरीसंप्राप्तये दध्यौ कामाक्षीं नियतेंद्रियः।।३७।।

तत्रापि कृतसांनिध्या श्रीविद्यादेवता परा।।
आचष्ट कृपया तुष्टा ध्यायंतं निश्चलं शिवम्।।३८।।

अलं ध्यानेन कंदर्पदर्पघ्न त्वं ममाज्ञया।।
अंगीकुरुष्व कंदर्पं भूयो मच्छासने स्थितम्।।३९।।

एकाम्रसंज्ञे मत्पीठे त्विहैव निवसन्सदा।।
त्वमेवागत्य मत्प्रीत्यै संनिधौ मम सुव्रत।।
गौरीमनुगृहाण त्वं कपतीरनिवासिनीम्।।४०।।

तापद्वयं जहीह्याशु योगजं तद्वियोगजम्।।
इत्युक्त्वांतर्दधे तस्य हृदये परमा रमा।।४१।।

शिवो व्युत्थाय सहसा धीरः संहृष्टमानसः।।
तस्य अनुग्रहं लब्ध्वा सर्वदेवनिषेवितः।।४२।।

हृदि ध्यायंश्च तामेव महात्रिपुरसुन्दरीम्।।
यद्विलासात्समुत्पन्नं लयं याति च यत्र वै।।४३।।

जगच्चराचरं चैतत्प्रपंचद्वितयात्मकम्।।
भूषयन्तीं शिवां कम्पामनुकंपार्द्रमानसाम्।।४४।।

अङ्गीकृत्य तदा गौरी वैवाहिकविधानतः।।
आदाय वृषमारुह्य कैलास शिखरं ययौ।।४५।।

पुनरन्यं महप्राज्ञ समाकर्णय कुम्भज।।
आदिलक्ष्म्याः प्रभावं तु कथयामि तवानघ।।४६।।

सभायां ब्रह्मणो गत्वा समासेदुस्त्रिमूर्त्रयः।।
दिक्पालाश्च सुराः सर्वे सनकाद्याश्च योगिनः।।४७।।

देवर्षयो नारदाद्या वशिष्ठाद्याश्च तापसाः।।
ते सर्वे सहितास्तत्र ब्रह्मणश्च कपर्दिनः।।
द्वयोः पंचमुखत्वेन भेदं न विविदुस्तदा।।४८।।

अन्योन्यं पृष्टवंतस्ते ब्रह्मा कः कश्च शङ्करः।।
तेषां संवदतां मध्ये क्षिप्रमंतर्हितः शिवः।।४९।।

तदा पंचमुखो ब्रह्म सितो नारायणस्तयोः।।
उभयोरपि संवादस्त्वहं ब्रह्मेत्यजायत।।५०।।

अज्ञ मन्नाभिकमलाज्जातस्त्वं यन्ममात्मजः।।
सृष्टिकर्ता त्वहं ब्रह्मा नामसाधर्म्यतस्तथा।।
त्वं च रुद्रश्च मे पुत्रौ सृष्टिकर्तुरुभौ युवाम्।।५१।।

इति मायामोहितयोरुभयोरंतरे तदा।।
तयोश्च स्वस्य माहात्म्यमहं ब्रह्मेति दर्शयन्।।
प्रादुरासीन्महाज्योतिस्तंभरूपो महेश्वरः।।५२।।

ज्ञात्वैवैनं महेशानं विष्णुस्तूष्णीं ततः स्थितः।।
पंचवक्त्रस्ततो ब्रह्मा ह्यवमत्यैवमास्थितः।।
ब्रह्मणः शिरसामूर्ध्वं ज्योतिश्चक्रमभूत्पुरः।।५३।।

तन्मध्ये संस्थितो देवः प्रादुरासोमया सह।।
ऊर्ध्वमैक्षथ भूयस्तमवमत्य वचोऽब्रवीत्।।५४।।

तन्निशम्य भृशं क्रोधमवाप त्रिपुरान्तकः।।
विष्णुमेवं तदालोक्य क्रोधेनैव विकारतः।।५५।।

तयोरेव समुत्पन्नो भैरवः क्रोधसंयुतः।।
मूर्धानमेकं चिच्छेद नखेनैव तदा विधेः।।
हाहेति तत्र सर्वेऽपि क्रन्दंतश्च पलायिताः।।५६।।

अथ ब्रह्मकपालं तु नखलग्नं स भैरवः।।
भूयोभूयो धुनोति स्म तथापि न मुमोच तम्।।५७।।

तद्ब्रह्महत्यामुक्त्यर्थे चचार धरणीतले।।
पुण्यक्षेत्राणि सर्वाणि गंगाद्याश्च महानदीः।।५८।।

न च ताभिर्विमुक्तोऽभूत्कपाली ब्रह्महत्यया।।
विषण्णवदनो दीनो निःश्रीक इव लक्षितः।।
चिरेण प्राप्तवान्कांचीं ब्रह्मणा पूर्वमोषिताम्।।५९।।

तत्र भिक्षामटन्नित्यं सेवमानः परां श्रियम्।।
पंचतीर्थे प्रतिदिनं स्नात्वा भूलक्षणांकिते।।६०।।

कश्चित्कालमुवासाथ प्रभ्रान्त इव बिल्वलः।।
कांचीक्षेत्रनिवासेन क्रमेण प्रयताशयः।।६१।।

निर्धूतनिखिलातंकः श्रीदेवीं मनसा वहन्।।
उत्तरे सेवितुं लक्ष्म्या वासुदेवेन दक्षिणे।।६२।।

श्रीकामकोष्टमागत्य पुरस्तात्तस्य संस्थितः।।
आदिलक्ष्मीपदध्यानमाततान् यतात्मवान्।।६३।।

यथा दीपो निवातस्थो निस्तरंगो यथांबुधिः।।
तथांतर्वायुरोधेन च चचालाचलेश्वरः।।६४।।

तैलधारावदच्छिन्नामनवच्छिन्नभैरवः।।
वितेने शैलतनयानाथश्रीध्यानसन्ततिम्।।
न ब्रह्मा नैव विष्णुर्वा न सिद्धः कपिलोऽपि वा।।
नान्ये च सनकाद्या ये मुनयो वा शुकादयः।।
तया समाधिनिष्ठायां न समर्थाः कथंचन।।६६।।

अथ श्रीभावयोगेन श्रीभावं प्राप्तवाञ्शिवः।।
ततः प्रसन्ना श्रीदेवी प्रभामण्डलवर्तिनी।।
अर्धरात्रे पुरः स्थित्वा वाचं प्रोवाच वाङ्मयी।।६७।।

श्रीकण्ठ सर्वपापघ्न किं पापं तव विद्यते।।
मद्रूपस्त्वं कथं देह: सेयं लोकविडम्बना।।६८।।

श्वोभूते ब्रह्महत्याया: क्षणान्मुक्तो भविष्यसि।।
इत्युक्त्वान्तर्दधे तत्र महासिंहासनेश्वरी।।६९।।

भैरवोऽपि प्रहृष्टात्मा कृतार्थ: श्रीविलोकनात्।।
विनीय तं निशाशेषं श्रीध्यानैकपरायण:।।७०।।

प्रात: पञ्चमह्मतीर्थे स्नात्वा सन्ध्यामुपास्य च।।
पुन: पुनर्धूनुते स्म परलग्नं कपालकम्।।७१।।

तथापि तत्तु नास्रंसत्स निर्वेदं परं गत:।।
स्वप्न: किमेष माया वा मानसभ्रांतिरेव वा।।७२।।

मुहुरेवं विचिंत्येश: शोकव्याकुलमानस:।।
स्वयमेव निगृह्याथ शोकं धीरग्रणी: शिव:।।७३।।

तुलसीमण्डलं गत्वा पूजयित्वा पुर: स्थित:।।
निगृहीतेंद्रियग्राम: समाधिस्थोऽभवत्पुन:।।६४।।

याममात्रे गते देवी पुन: सांनिध्यमागता।।
अलं समाधिना शम्भो निमज्जात्र सरोवरे।।७५।।

इत्या दिश्य तिरोऽधत्त सोऽपि चिंतामुपागमत्।।
इयं च माया स्वप्नो वा किं कर्त्तव्यं मयाथ वा।।७६।।

श्वोभूते ब्रह्महत्याया: क्षणान्मुक्तो भविष्यसि।।
इत्युक्तं श्रीपरादेव्या यामातीतमिदं दिनम्।।७७।।

एवं सर्वं च मिथ्यैवेत्यधिकं चिन्तयावृत:।।
भगवान्व्योमवाण्या तु निमज्जाप्स्विति गर्जितम्।।७८।।

श्रुत्वा शङ्कां समुत्सृज्य तत्त्वं निश्चित्य शङ्कर:।।
निममज्ज सरस्यां तु गङ्गायां पुनरुत्थित:।।७९।।

तत्र काशीं समालोक्य किमेतदिति चिन्तयन्।।
स मुहुर्तं स्थितस्तूष्णीं नखलीनकपालक:।।८०।।

ललाटंतपमुद्वीक्ष्य तरणिं तरुणेंदुभृत्।।
भिक्षार्थं नगरीमेनां प्रविवेश वशी शिव:।।८१।।

गृहाणि कानिचिद्रत्वा प्रतोल्यां पर्यटन्भव:।।
सोऽपश्यदग्रत: कांचित्कांचीं श्रीदवताकृतिम्।।७२।।

भिक्षां ज्योतिर्मयीं तस्मै दत्वा क्षिप्रं तिरोदधे।।
क्षणाद्ब्रह्मकपालं तत्प्रच्युतं तन्नवाग्रत:।।८३।।

तदृष्ट्वाद्भुतमीशान: कामाक्षीशीलमुत्तमम्।।
प्रसन्नवदनांभोजो बहुमेने मुहु: परम्।।८४।।

पुरी कांची पुरी पुण्या नदी कंपा नदी परा।।
देवता सैव कामाक्षीत्यासीत्संभावना पुर:।।८५।।

इत्थं देवीप्रभावेण विमुक्त: संकटाद्धर:।।
स्वस्थ: स्वस्थानमगच्छलाघमान: परां श्रियम्।।८६।।

(DASARATHA'S VISIT TO KANCHI AND PRAYER TO THE THE GOODESS)

पुरनरन्यत्प्रवक्ष्यामि विलासं श्रुणु कुम्भज:।।
प्रभावं श्रीमहादेव्या: कामदं श्रृण्वतां सदा।।८७।।

अयोध्याधिपति: श्रीमान्नाम्ना दशरथो नृप:।।
सन्तानरहितोऽतिष्टद्बहुलं शुचाकुल:।।८८।।

रहस्याहुय मतिमान्वशिष्टं स्वपुरोहितम्।।
उवाचाचारसंशुद्ध: सर्वशास्त्रार्थवेदिनम्।।८९।।

श्रीनाथ बहवोऽतीताः काला नाधिगतः सुतः।।
संततेर्मम संतापः संततं वर्धतेतराम्।।
किं कुर्वे यदि संतानसंपत्स्यात्तन्निवेदय।।९०।।

वशिष्ठ उवाचा।।

मम वंशे महाराज रहस्यं कथयामि ते।।
अयोध्या मथुरा माया काशी कांची ह्यवंतिका।।
एता पुण्यतमाः प्रोक्ताः पुरीणामुत्तमोत्तमाः।।९१।।

अस्याः सांनिध्यमात्रेण महात्रिपुरसुन्दरीम्।।
अर्चयंति ह्ययोध्यायां मनुष्या अधिदेवताम्।।९२।।

नैतस्याः सदृशी काचिद्देवता विद्यते परा।।
एनामेवार्चयंत्यन्ये सर्वे श्रीदेवतां नृपा।।९३।।

ब्रह्मविष्णुमहेशाद्याः सस्त्रीकाः सर्वदा सदा।।
नारिकेलफलालीभिः पनसैः कदलीफलैः।।९४।।

मध्वाज्यशर्कराप्राज्यैर्महापायसाराशिभिः।।
सिद्धद्रव्यविशेषैश्च पूजयेत्त्रिपुरांबिकाम्।।
अभीष्टमचिरेणैव संप्रदास्यति सैव नः।।९५।।

इत्युक्तवन्तमभ्यर्च्य गुरुमिष्टैरुपायनैः।।
स्वाङ्गजप्राप्तये भूयो विससर्ज विशांपतिः।।९६।।

ततोगुरूक्तरीत्यैव ललिता परमेश्वरीम्।।
अर्चयामास राजेंद्रो भक्त्या परमया युतः।।९७।।

एवं प्रतिदिनं पूजां विधाय प्रीतमानसः।।
अयोध्यादेवताधामामशिषत्तत्र सङ्गतः।।९८।।

अर्धरात्रे व्यतीते तु निभृतोल्लासदीपिके।।
किञ्चिन्निदालसस्यास्य पुरतस्त्रिपुरांबिका।।९९।।

पाशांकुशधनुर्बाणपरिष्कृतचतुर्भुजा।।
सर्वश्रृङ्गारवेषाढ्या सर्वाभरणभूषिता।।
स्थित्वा वाचमुवाचेमां मन्दमिन्दुमतीसुतम्।।१००।।

अस्ति पंक्तिरथ श्रीमन्पुत्रभाग्यं तवानघ।।
विश्वासघातकर्माणि संति पूर्वकृतानि ते।।१०१।।

तादृशां कर्मणां शांत्यै गत्वा काञ्चीपुरं वरम्।।
स्नात्वा कम्पासरस्यां च तत्र मां पश्य पावनीम्।।१०२।।

मध्ये काञ्चीपुरस्य त्वं कन्दराकाशमध्यगम्।।
कामकोष्टं विपाप्मपि सप्तद्वारबिलान्वितम्।।१०३।।

साम्राज्यसूचकं पुंसां त्रयाणामपि सिद्धिदम्।।
प्राङ्मुखी तत्र वर्तेऽह महासिंहासनेश्वरी।।१०४।।

महालक्ष्मीस्वरूपेण द्विभुजा पद्मधारिणी।।
चक्रेश्वरी महाराज्ञी ह्यदृश्या स्थूलचक्षुषाम्।।१०५।।

ममाक्षिजा महागौरी वर्तते मम दक्षिणे।।
सौन्दर्यसारसीमा सा सर्वाभरणभूषिता।।१०६।।

मया च कल्पिताऽऽवासा द्विभुजा पद्मधारिणी।।
महालक्ष्मीस्वरूपेण किं वा कृत्यात्मना स्थिता।।१०७।।

आपीठमौलिपर्यन्तं पश्य तस्तां ममांशजाम्।।
पातकान्याशु नश्यंति किं पुनस्तूपपातकम्।।१०८।।

कुवासना कुबुद्धिश्च कुतर्कनिचयश्च यः।।
कुदेहश्च कुभावश्च नास्तिकत्वं लयं व्रजेत्।।१०९।।

कुरुष्व मे महापूजां सितामध्वाज्यपायसैः।।
विविधैर्भक्ष्यभोज्यैश्च पदार्थैः षड्रसान्वितैः।।११०।।

तत्रैव सुप्रसन्नाहं पूरयिष्यामि ते वरम्।।
उपदिश्येति सम्राज्ञी दिव्यमूर्तिस्तिरोदधे।।१११।।

राजापि सहसोत्थाय किमेतदिति विस्मितः।।
देवीमुद्बोध्य कौसल्यां शुभलक्षणलक्षिताम्।।११२।।

तस्यै तद्रात्रिवृत्तांतं कथयामास सादरम्।।
तत्समाकर्ण्य सा देवी सन्तोषमभजत्तदा।।११३।।

प्राप्तहर्षो नृपः प्रातस्तया दयितया सह।।
अनीकसचिवोपेतः काञ्चीपुरमुपागमत्।।११४।।

स्नात्वा कंपातरंगिण्यां दृष्ठ्वा देवीं च पावनीम्।।
पञ्चतीर्थे ततः स्नात्वा देव्या कौसल्यया नृपः।।११५।।

गोभूवस्त्रहिरण्याद्यैस्तत्तीर्थक्षेत्रवसिनः।।
प्रीणयित्वा सपत्नीकस्तथा तद्भक्तिपूजकान्।।११६।।

अथालयं समाविश्य महाभक्त्या नृपोत्तमः।।
प्रदक्षिणत्रयं कृत्वा विनयेन समन्वितः।।११७।।

ततः संनिधिमागत्य देव्या कौसल्यया सह।।
श्रीकामकोष्टनिलयं महात्रिपुरसुन्दरीम्।।११८।।

त्रिमूर्तिजननीमंबां दृष्ट्वा श्रीचक्ररूपिणीम्।।
प्रणिपत्य तु साष्टांगं भार्यया सह भक्तिमान्।।११९।।

स्वपुरे त्रैपुरे धाम्नि पुरेक्ष्वाकुप्रवर्तिते।।
दुर्वासा सशिष्येण पूजार्थं पूर्वकल्पिते।।१२०।।

दासीदासध्वजारोहगृहोत्सवसमन्विते।।
तत्र स्वगुरुणोक्तं च कृत्वा स्वात्मार्घपूजनम्।।१२१।।

रात्रौ स्वप्ने तु यद्रूपं दृष्टवान्स्वपुरे महः।।
तदेवात्रापि संदध्यौ सन्निधौ राजसत्तमः।।१२२।।

चिरं ध्यात्वा महाराजः सुवासांसि बहूनि च।।
दिव्यान्यायतनान्यस्यै दत्वा स्तोत्रं चकार ह।।१२३।।

दशरथ उवाच-

पादाग्रलंबिपरमाभरणाभिरामे मञ्जीररत्नरुचिमञ्जुलपादद्मे।।
पीतांबरस्फुरितपेशलहेमकाञ्चि
केयूरकङ्कणपरिष्कृतबाहुवल्लि।।१२४।।

पुंड्रेक्षुचापविलसन्मृदुवामपाणे रत्नोर्मिकासुमशारञ्चितदक्षहस्ते।।
वक्षोजमंडलविलासिवलक्षहारि
पाशांकुशांगदलसद्भुजशोभितांगि।।१२५।।

वक्त्रश्रिया विजितशारदचन्द्रबिम्बे ताटंकरत्नकरमण्डितगंडभागे।।
वामे करे सरसिजं सुबिसं दधाने कारुण्यनिर्झरदपाङ्गयुते
महेशि।।१२६।।

माणिक्यसूत्रमणिभासुरकंबुकंठि
भालस्थचन्द्रशकलोज्ज्वलितालकाढ्ये।।
मंदस्मितस्फुरणशालिनि मंजुनासे नेत्रश्रिया
विजितनीलसरोजपत्रे।।१२७।।

सभ्रूलते सुवदने सुललाटचित्रे योगींद्रमानससरोजनिवासहंसि।।
रत्नानुबद्धतपनीयमहाकिरीटे सर्वांगसुन्दरी -
समस्तसुरेन्द्रवंद्ये।।१२८।।

कांक्षानुरूपवरदे करुणार्द्रचित्ते साम्रज्यसम्पदभिमानिनि चक्रनाथे।।
इन्द्रादिदेवपरिसेवितपादपद्मे सिहासनेश्वरि परे मयि
संनिदध्याः।।१२९।।

इति स्तुत्वा न भूपालो बहिर्निर्गत्य भक्तितः।।
तस्यास्तु दक्षिणे भागे महागौरीं ददर्श ह।।१३०।।

प्रणम्य दंडवद्भूमौ कृत्वा चास्याः स्तुतिं पुनः।।
दत्वा चास्यै महार्हाणि वासांसि विविधानि च।।१३१।।

अमूल्यानि महार्हाणि भूषणानि महांति च।।
ततः प्रदक्षिणीकृत्य निर्गत्य सह भार्यया।।१३२।।

स्वगुरूक्तविधानेन महापूजां विधाय च।।
तामेव चिन्तयंस्तत्र सप्तरात्रमुवास सः।।१३३।।

अष्टमे दिवसे देवीं नत्वा भक्त्या विलोकयन्।।
अम्बीभीष्टं प्रदेहीति प्रार्थयामास चेतसा।।१३४।।

सुप्रसन्ना च कामाक्षी सांतरिक्षगिरावदत्।।
भविष्यंति मदंशास्ते चत्वारस्तनया नृपा।।१३५।।

इत्युदीरितमाकर्ण्य प्रमोदविकसन्मुखः।।
श्रियं प्रणम्य साष्टांगमनन्यशरणः पराम्।।१३६।।

आमन्त्र्य मनसैवांबां सस्त्रीकः सह मन्त्रिभिः।।
अयोध्यां नगरीं प्रापदिंदुमत्यास्तु नन्दनः।।१३७।।

एवं प्रभावा कामाक्षी सर्वलोकहितैषिणी।।
सर्वेषामपि भक्तानां कांक्षितं पूरयत्यलम्।।१३८।।

एनां लोकेषु बहवः कामाक्षीं परदेवताम्।।
उपास्य विधिवद्भक्त्या प्राप्ताः कामानशेषतः।।१३९।।

अद्यापि प्राप्नुवंत्येव भक्तिमन्तः फलं मुने।।
अनेके च भविष्यंति कामाक्ष्याः करुणादृशाः।।१४०।।

माहात्म्यमस्याः श्रीदेव्याः को वा वर्णयितुं क्षमः।।
नाहं न शुम्भुर्न ब्रह्मा न विष्णुः किमुतापरे।।१४१।।

इति ते कथितं किञ्चित्कामाक्ष्याः शीलमुज्ज्वलम्।।
श्रृण्वतां पठतां चापि सर्वपापहरं स्मृतम्।।१४२।।

(WORSHIP OF GODDESS AND MAGICAL BENEFITS)

अगस्त्य उवाच।।

कीदृशं यंत्रमेतस्या मंत्रो वा कीदृशो वरः।।
उपदेष्टा च कीदृक्स्याच्छिष्यो वा कीदृशः स्मृतः।।१।।

सर्वज्ञस्त्वं हयग्रीव साक्षात्परमपूरुषः।।
स्वमिन्मयि कृपादृष्ट्या सर्वमेतन्निवेदय।।२।।

हयग्रीव उवाच।।

मंत्र श्रीचक्रमेवास्याः सेयं हि त्रिपुरांबिका।।
सैषैव हि महालक्ष्मीः स्फुरच्चैवात्मनः पुरा।।३।।

पश्यति स्म तदा चक्रं ज्योतिर्मयविजृंभितम्।।
अस्य चक्रस्य माहात्म्यपरिज्ञेयमेव हि।।४।।

साक्षात्सैव महालक्ष्मीः श्रीचक्रमिति तत्वतः।।
यदभ्यर्च्य महाविष्णुः सर्वलोकविमोहनम्।।

कामसंमोहिनीरूपं भेजे राजीवलोचनः।।
अर्चयित्वा तदीशानः सर्वविद्येश्वरोऽभवत्।।

तदाराध्य विशेषेण ब्रह्मा ब्रह्मांडसूरभूत्।।
मुनीनां मोहनश्चासीत्स्मरो यद्वरिवस्यया।।६।।

श्रीदेव्याः पुरतश्चक्रं हेमरौप्यादिनिर्मितम्।।
निधाय गन्धैरभ्यर्च्य षोडशाक्षरविद्याया।।७।।

प्रत्यहं तुलसीपत्रैः पवित्रैर्मंगलाकृतिः।।
सहस्त्रैर्मूलमंत्रेण श्रीदेवीध्यानसंयुतः।।८।।

अर्चयित्वा च मध्वाज्यशर्करापायसैः शुभैः।।
अनवद्यैश्चनैवैर्माषापूपैर्मनोहरैः।।९।।

य: प्रीणाति महालक्ष्मीं मतिमान्मण्डलत्रये।।
सहसा तस्य सांनिध्यमाधत्ते परमेश्वरी।।१०।।

मनसा वाञ्छितं यच्च प्रसन्ना तत्प्रपूरयेत्।।
धवलै कुसुमैश्चक्रमुक्तरीत्या तु योऽर्चयेत्।।११।।

तस्यैव रसनाभागे नित्यं नृत्यति भारती।।
पाटलै: कुसुमैश्चकं योऽर्चयेदुक्तमार्गत:।।।।
सार्वमौमं च राजानं दासवद्वशयेदसौ।।१२।।

पीतवर्णै: शुभै: पुष्पै: पूर्ववत्पूजयेच्च य:।।
तस्य वक्षस्थले नित्यं साक्षाच्छ्रीर्वसति ध्रुवम्।।१३।।

दुर्गंधैर्गंधहीनैश्च सुवर्णैरपि नार्चयेत्।।
सुगन्धैरेव कुसमै: पुष्पैश्चाभ्यर्चयेच्छिवाम्।।१४।।

कामाक्ष्यैव महालक्ष्मीश्चक्रं श्रीचक्रमेव हि।।
श्रीविद्यैषा परा विद्या नायिका गुरुनायिका।।१५।।

एतस्या मंत्रराजस्तु श्रीविद्यैव तपोधन।।
कामराजांतमत्रांते श्रीबीजेन समन्वित:।।१६।।

षोडशाक्षरीविद्येयं श्रीविद्यति प्रकीर्तिता।।
इत्थं रहस्यमाख्यातं गोपनीयं प्रयत्नत:।।१७।।

तिसृणामपि मूर्तीनां शक्तिर्विद्येयमीरिता।।
सर्वेषामपि मंत्राणां विद्यैषा प्राणरूपिणी।।१८।।

पारंपर्येण विज्ञाता विद्येयं बन्धमोचनी।।
संस्मृता पापहरणी जरामृत्युविनाशिनी।।१९।।

पूजिता दु:खदौर्भाग्यव्याधिदारिद्र्यनाशिनी।।
स्तुता विघ्नौघशमिनी ध्यांता सर्वार्थासिद्धिदा।।२०।।

मुद्राविशेषतत्वज्ञो दीक्षाक्षपितकल्मषः।।
भजेद्यः परमेशानीमभीष्टफलमाप्नुयात्।।२१।।

धवलांबरसंवीतां धवलावासमध्यगाम्।।
पूजयेद्धवलैः पुष्पैर्ब्रह्मचर्ययुतो नरः।।२२।।

धवलैश्चैव नैवेद्यैर्दधिक्षीरोदनादिभिः।।
संकल्पधवलैर्वापि पूजयेत्परमेश्वरीम्।।२३।।

श्रीर्वालंत्र्यक्षीबीजैः क्रमात्खंडेषु योजितयाम्।।
षोडशाक्षरविद्यां तामर्चयेच्छुद्धमानसः।।२४।।

अनुलोमविलोमेन प्रजपन्मातृकाक्षरैः।।२५।।

भावयन्नैव देवाग्रे श्रीदेवीं दीपरूपिणीम्।।
मनसोपांशुना वापि निगदेनापि तापस।।२६।।

श्रीदेवीन्याससहितः श्रीदेवीकृतविग्रहः।।
एकलक्षजपेनैव महापापैः प्रमुच्यते।।२७।।

लक्षद्वयेन देवर्षे सप्तजन्मकृतान्यपि।।
पापानि न।श्यंत्येव साधकस्य परा कला।।२८।।

लक्षीत्रितयजापेन सहस्रजनिपातकैः।।
मुच्यते नात्र संदेहो निर्मलो नितरां मुने।।
क्रमात्षोडशलक्षेण देवीसांनिध्यमाप्नुयात्।।२९।।

पूजा त्रैकालिकी नित्यं जपस्तर्पणमेव च।।
होमो ब्राह्मणभुक्तिश्च पुरश्चरणमुच्यते।।३०।।

होमतर्पणयोः स्वाहा न्यासपूजनयोर्नमः।।
मंत्रांते पूजयेद्देवीं जपकाले यथोचितम्।।३१।।

जपाद्दशांशो होमः स्यात्त द्दशांशं तु तर्पणम्।।
तद्दशांश ब्राह्मणानां भोजनं विन्ध्यमर्दन।।३२।।

देशकालोपघाते तु यद्यदंगं विहीयते।।
तत्संख्याद्विगुणं जप्त्वा पुरश्चर्या समापयेत्।।३३।।

ततः काम्यप्रयोगार्थं पुनर्लक्षत्रयं जपेत्।।
व्रतस्थो निर्विकारश्च त्रिकालं पूजने रतः।।
पश्चाद्वसश्यादिकर्माणि कुर्वन्सिद्धिमवाप्स्यति।।३४।।

अभ्यर्च्य चक्रमध्यस्थो मंत्री चिन्तयते यदा।।
सर्वमात्मानमरुणं साध्यमप्यरुणीकृतम्।।३५।।

ततो भवति विन्ध्यारे सर्वसौभाग्यसुन्दरः।।
वल्लभः सर्वलोकानां वशयेन्नात्र संशयः।।३६।।

रोचनाकुंकुमाभ्यां तु समभागं तु चन्दनम्।।
शतमष्टोत्तरं जप्त्वा तिलकं कारयेद् बुधः।।३७।।

ततो यमीक्षते वक्ति स्पृशते चिन्तयेच्च यम्।।
अर्धेन च शरीरेण स वशं याति दासवत्।।३८।।

तथा पुष्पं फलं गन्धं पानं वस्त्र तपोधन।।
शतमष्टोत्तरं जप्त्वा यस्यै संप्रेष्यते स्त्रियै।।
सद्य आकृष्यते सा तु विमूढहृदया सती।।३९।।

लिखेद्रोचनयैकांते प्रतिमानवनीतले।।
सुरूपां च सश्रृङ्गारवेषाभरणमांडितम्।।४०।।

तद्भालगलहृन्नाभिजानुमंडलयोजितम्।।
जन्मनाम महाविद्यामंकुशांतर्विदर्भितम्।।४१।।

सर्वांगसंधिसंलीनामालिख्य मदनाक्षरैः।।
तदाशाभिमुखो भूत्वा त्रिपुरीकृतविग्रहः।।४२।।

बद्धा तु क्षोभिणी मुद्रां विद्यामष्टशतं जपेत्।।
संयोज्य दहनागारे चन्द्रसूर्यप्रभाकुले।।४३।।

ततो विह्वलितापांगीमनङ्गशरपीडिताम्।।
प्रज्वलन्मदनोन्मेषप्रस्फुरज्जघनस्थलाम्।।४४।।

शक्तिचक्रे लसद्रश्मिवलनाकवलीकृताम्।।
दूरीकृतसुचारित्रां विशालनयनाम्बुजाम्।।४५।।

आकृष्टनयनां नष्टधैर्यसंलीनव्रीडनाम्।।
मन्त्रयन्त्रौषधमहामुद्रानिगडबंधनाम्।।
नवानुरागसंधानवेपमानहृदंबुजाम्।।४६।।

मनोऽधिकमहामंत्रजपमानां हृतांशुकाम्।।
विमुढामिव विक्षुब्धामिव प्लुष्टामिवाद्धताम्।।४७।।

लिखितामिव निः संज्ञामिवऽमथितामिव।।
निलीनामिव निश्चेष्टामिवान्यत्वं गतामिव।।४८।।

भ्रमन्मन्त्रानिलोद्धूतवेणुपत्राकृतिं च खे।।
भ्रमन्तीं भावयेन्नारीं योजनानां शतादपि।।४९।।

चक्रमध्यगतां पृथ्वीं सशैलवनकाननाम्।।
चतुःसमुद्रपर्यंतं ज्वलंतीं चिंतयेत्ततः।।५०।।

षण्मासाभ्यासयोगेन जायते मदनोपमः।।
दृष्ट्वा कर्षयते लोकं दृष्ट्वैव कुरुते वशम्।।५१।।

दृष्ट्वा संक्षोभयेन्नारीं दृष्ट्वैव हरते विषम्।।
दृष्ट्वा करीति वागीशं दृष्ट्वा सर्वं विमोहयेत्।।
दृष्ट्वा चातुर्थिकादींश्च ज्वरान्नाशयते क्षणात्।।५२।।

पीतद्रव्येण लिखितं चक्रं गूढं तु धारयेत्।।
वाक्स्तंभं वादिनां क्षिप्रं कुरुते नात्र संशयः।।५३।।

महानीलीरसेनापि शत्रुनामयुतं लिखेत्।।
दक्षिणाभिमुखो वह्नौ दग्ध्वा मारयते रिपून्।।५४।।

महिषाश्वपुरीषाभ्यां गोमूत्रैर्नाम टंकितम्।।
आरनालस्थितं चक्रं विद्वेषं कुरुते द्विषाम्।।५५।।

युक्त्वा रोचनया नाम काकपक्षेण मध्यगम्।।
लंबमानस्तदाकारो उच्चाटनकरं परम्।।५६।।

दुग्धलाक्षा रोचनाभिर्महानीलिरसेन च।।
लिखित्वा धारयंश्चक्रं चातुर्वर्ण्यं वशं नयेत्।।५७।।

अनेनैव विधानेन जलमध्ये यदि क्षिपेत्।।
सौभाग्यमतुलं तस्य स्नानपानान्नसंशयः।।५८।।

चक्रमध्यगतं देशं नगरी वा वरांगनाम्।।
ज्वलंतीं चिंतयोन्नित्यं सप्ताहात्क्षोभयेन्मुने।।५९।।

लिखित्वा पीतवर्णं तु चक्रमेतद्यदाचरेत्।।
पूर्वाशाभिमुखो भूत्वा स्तंभयेत्सर्ववादिनः।।६०।।

सिंदूरवर्णालिखितं पूजयेदुत्तरामुखः।।
यदा तदा स्ववशगो लोको भवति नान्यथा।।६१।।

चक्रं गैरिकयालिख्य पूजयेत्पश्चिमामुखः।।
यः स सर्वाङ्गनाकर्षवश्यक्षोभकरो भवेत्।।६२।।

पूजयेद्विंध्यदर्परि रहस्येकचरो गिरौ।।
अजरामरतां मन्त्री लभते नात्र संशयः।।६३।।

रहस्यमेतत्कथितं गोपितव्यं महामुने।।
गोपनात्सर्वसिद्धिः स्याद् भ्रंश एव प्रकाशनात्।।६४।।

अविधाय पुरश्चर्यां यः कर्म कुरुते मुने।।
देवताशापमाप्नोति न च सिद्धिं स विंदति।।६५।।

प्रयोगदोषशांत्यर्थं पुनर्लक्षं जपेद्बुधः।।
कुर्याच्च विधिवत्पूजां पुनर्योग्यो भवेन्नरः।।६६।।

निष्कामो देवतां नित्यं योऽर्चयेद्भक्तिनिर्भरः।।
तामेव चिंतयन्नास्ते यथाशक्ति मनुं जपन्।।६७।।

सैव तस्यैहिकं भारं वहेन्मुक्तिं च साधयेत्।।
सदा संनिहिता तस्य सर्वं च कथयेत सा।।६८।।

वात्सल्यसहिता धेनु र्यथा वत्समनुव्रजेत्।।
तथानुगच्छेत्सा देवी स्वभक्तं शरणागतम्।।६९।।

(MANNER OF WORSHIP AND MEANING OF SUB-MISSION)

अगस्त्य उवाच।।

शरणागतशब्दस्य कोऽर्थो वद हयानन।।
वत्सं गौरि धावन्तमनुधावति।।१।।

हयग्रीव उवाच।।

यः पुमानखिलं भारमैहिकामुष्मिकात्मकम्।।
श्रीदेवतायां निक्षिप्य सदा तद्गतमानसः।।२।।

सर्वानुकूलः सर्वत्र प्रतिकूलविवर्जितः।।
अनन्यशरणो गौरीं दृढं सम्प्रार्थ्य रक्षणे।।७३।।

रक्षिष्यतीति विश्वासस्तत्सेवैकप्रयोजनः।।
वरिवस्यातत्परः स्यात्सा एव शरणागतिः।।४।।

यदा कदाचित्स्तुतिनिंदनादौ निंदन्तु लोकाः स्तुवतां जनो वा।।
इति स्वरूपं सुधिया समीक्ष्य विषादखेदौ न भजेत्प्रपन्नः।।५।।

अनुकुलस्य संकल्पः प्रतिकूलस्य वर्जनम्।।
रक्षिष्यतीति विश्वासो गोप्तृववरणं तथा।।६।।

आत्मनिक्षेपकार्पण्ये षड्विधा शरणागतिः।।
अङ्गीकृत्यात्मनिक्षेपं पञ्चांगानि समर्पयेत्।।
न ह्यस्य सदृशं किंचिद्भुक्त्योमुक्तयोस्तु साधनम्।।७।।

अमनित्वमदांभित्वमहिंसा क्षांतिरार्जवम्।।
आचार्योपासनं शौचं स्थैर्यमात्मविनिग्रह:।।८।।

इन्द्रियार्थेषु वैराग्यमनहंकार एव च।।
जन्ममृत्युजराव्याधिदु:खदोषानुदर्शनम्।।
असक्तिरनभिष्वंग: पुत्रदारगृहादिषु।।९।।

नित्यं च समचितचत्त्वमिष्टोपपत्तिषु।।
मयि चानन्यभावेन भक्तिरव्यभिचारिणी।।१०।।

विविक्तदेशसेवित्वमरतिर्जनसंसदि।।
अध्यात्मज्ञाननित्यत्वं तत्वज्ञानार्थदर्शनम्।।
एतानि सर्वदा ज्ञानसाधनानि समभ्यसेत्।।११।।

तत्कर्मकृतत्परमस्तद्भक्त: संगवर्जित:।।
निर्वैर: सर्वभूतेषु य: स याति परां श्रियतम्।।१२।।

गुरुस्तु मादृशो धीमान्ख्यातो वातापितापन।।
शिष्योऽपि त्वादृश: प्रोक्तो रहस्याम्नायदेशिक:।।१३।।

(THE MUDRAS IN WORSHIP)

अगस्त्य उवाच।।

मुद्राविरचनारीतिमश्वानन निवेदय।।
याभिर्विरचिताभिस्तु श्रीदेवी संप्रसीदति।।१।।

हयग्रीव उवाच।।

आवाहनी महामुद्रा त्रिखण्डेति प्रकीर्तिता।।
परिवृत्या करौ स्पष्टमङ्गुष्ठौ कारयेत्समौ।।२।।

अनामांतर्गते कृत्वा तर्जन्यौ कुटिलाकृती।।
कनिष्ठिके नियुञ्जीत निजस्थाने तपोधन।।
संक्षोमिण्याख्यमुद्रां तु कथयाम्यधुना श्रृणु।।३।।

मध्यमे मध्यगे कृत्वा कनिष्ठांगुष्ठरोधिते।।
तर्जन्यौ दंडवत्कृत्वा मध्यमोपर्यनमिके।।४।।

एतस्या एव मुद्राया मध्यमे सरले यदि।।
क्रियते विंध्यदर्पारे मुद्रा विद्राविणी तथा।।५।।

मध्यमातर्जनीभ्यां तु कनिष्ठानामिके समे।।
अंकुशाकाररुपाभ्यां मध्यगे कलशोद्भव।।
इयमाकर्षिणी मुद्रा त्रैलोक्याकर्षणे क्षमा।।६।।

पुटाकारौ करौ कृत्वा तर्जन्यावंकुशाकृती।।
परिवर्तक्रमेणैव मध्यमे तदधोगते।।७।।

क्रमेणानेन देवर्षे मध्यमामध्यगेऽनुजे।।
अनामिके तु सरले तद्बहिस्तर्जनीद्वयम्।।८।।

दंडाकारौ ततोंऽगुष्ठौ मध्यमावर्तदेशगौ।।
मुद्रैषोन्मादिनी नाम्ना ख्याता वातापितापन।।९।।

अस्यास्त्वनामिकायुग्ममधः कृत्वांकुशाकृति।।
तर्जन्यावपि तेनैव क्रमेण विनियोजयेत्।।१०।।

इयं महांकुशा मुद्रा सर्वकार्यार्थसाधिका।।११।।

सव्यं दक्षिणदेशे तु दक्षिणं सव्यदेशतः।।
बाहू कृत्वा तु देवर्षे हस्तौ सम्परिवर्त्य च।।१२।।

कनिष्ठानामिके युक्ते क्रमेणानेन तापस।।
तर्जनीभ्यां समाक्रान्ते सर्वोर्ध्वमपि मध्यमे।।१३।।

लोपामुद्रापतेङ्गुष्ठौ कारयेत्सकलावपि।।
इयं तु खेचरी नाम सर्वोत्तमोत्तमा।।
एतद्विज्ञानमात्रेण योगिनीनां प्रियो भवेत्।।१४।।

परिवर्त्य करौ स्पृष्टावर्धचन्द्रसमाकृती।।
तर्जन्यङ्गुष्ठयुगलं युगपद्योजयेत्ततः।।१५।।

अधः कनिष्ठावष्टब्धमध्यमे विनियोजत्।।
अथैते कुटिले युक्त्वा सर्वाधस्तादनामिके।।
बीजमुद्रेयमचिरात्सर्वसिद्धिप्रवर्तिनी।।१६।।

मध्याग्रे कुटिलाकारे तर्जन्युपरि संस्थिते।।
अनामिकामध्यगते तथैव हि कनिष्टिके।।१७।।

सर्वा एकत्र संयोज्य चाङ्गुष्टपरिपीडिताः।।
एषा तु प्रथमा मुद्रा योनिमुद्रेति संज्ञिता।।१८।।

एता मुद्रास्तु देवर्षे श्रीदेव्याः प्रीतिहेतवः।।
पूजाकाले प्रयोक्तव्या यथानुक्रमयोगतः।।१९।।

INITIATION : ITS VALUE AND KINDS

अगस्त्य उवाच।।

अश्वानन महाप्राज्ञ करुणामृतवारिधे।।
श्रीदेवीदर्शने दीक्षा यादृशी तां निवदेय।।१।।

हयग्रीव उवाच।।

यदि ते देवताभावो यया कल्मषकर्दमाः।।
क्षाल्यन्ते च तथा पुसां दीक्षामाचक्ष्महेऽत्र ताम्।।२।।

हस्ते शिवपुरं ध्यात्वा जपेन्मूलाङ्गमालिनीम्।।
गुरुः स्पृशेच्छिष्यतनुं स्पर्शदीक्षेयमीरिता।।३।।

निमील्य नयने ध्यात्वा श्रीकामाक्षीं प्रसन्नधीः।।
सम्यक्पश्येद्गुरुः शिष्यं दृग्दीक्षा सेयमुच्यते।।४।।

गुरोरालोकमात्रेण भाषणात्स्पर्शनादपि।।
सद्यः सञ्जायते ज्ञानं सा दीक्षा शाम्भवी मता।।५।।

देव्या देहो यथा प्रोक्तो गुरुदेहस्तथैव च।।
तत्प्रसादेन शिष्योऽपि तद्रूपः सम्प्रकाशते।।६।।

चिरं शुश्रूषया सम्यक्तोषितो देशिकेश्वरः।।
तूष्णीं संकल्पयेच्छिष्यं सा दीक्षा मानसी मता।।७।।

दीक्षाणामपि सर्वासामियमेवोत्तमोत्तमा।।
आदौ कुर्यात्क्रियादीक्षां तत्प्रकारः प्रवक्ष्यते।।८।।

शुक्लपक्षे शुभदिने विधाय शुचिमानसम्।।
जिह्वास्यमलशुद्धिं च कृत्वा स्नात्वा यथाविधि।।९।।

संध्याकर्म समाप्याथ गुरुदेहं परं स्मरन्।।
एकान्ते निवसेञ्छ्रीमान्मौनी च नियताशनः।।१०।।

गुरु श्च तादृशो भूत्वा पूजामंदिरमाविशेत्।।
देवीसूक्तेन संयुक्तं विद्यान्यासं समातृकम्।।११।।

कृत्वा पुरुषसूक्तेन षोडशैरुपचारकैः।।
आवाहनासने पाद्यमर्ध्यमाचमनं तथा।।१२।।

स्नानं वस्त्रं च भूषां च गन्धः पुष्पं तथैव च।।
धूपदीपौ च नैवेद्य ताम्बूलं च प्रदक्षिणा।।१३।।

प्रणामश्चेति विख्यातौ प्रीणयेत्त्रिपुरांबिकाम्।।
अथ पुष्पाञ्जलिं दद्यात्सहस्राक्षरविद्याया।।१४।।

ADORATION OF THE DEITIES IN THE NINE EN-CLOSURES OF SRĪ-CHAKRA

ॐ ऐं ह्रीं श्रीं ऐं क्लीं सौः ॐ नमस्त्रिपुरसुन्दरि हृदय देवि शिरोदेवि

शिखादेवि कवचदेवि नेत्रदेवि कामेश्वरि भगमालिनि नित्यक्लिन्नें भैरूंडे वह्निवासिनि महावज्रेश्वरि विद्येश्वरि परिशवदूति त्वरिते कुलसंन्दरि नित्ये नीलपताके विजये सर्वमङ्गले ज्वालामालिनि चित्रे महनित्ये परमेश्वरि मन्त्रेशमयि षष्ठीशमय्युद्यानमयि लोपामुद्रामय्यगस्त्यमयि कालतापनमयि प्रभाकरदेवमयि तेजोदेवमयि मनोजदेवमयि अणिमसिद्धे महिमसिद्धे गरिमसिद्धे लघिमसिद्धे ईशित्वसिद्धे वशित्वसिद्धे प्राकाम्यसिद्धे रससिद्धे सर्वसंक्षोभिणि सर्वाविद्राविणि सर्वाकर्षिणि सर्वस्त्रखंडिनि त्रैलौक्यमोहिनि चक्रस्वामिनि प्रकटयोगिनि बौद्धदर्शनांगि कामार्षिणि बुद्ध्याकर्षिणि अहंकाराकर्षिणि स्पर्शाकर्षिणि रूपाकर्षिणि रसाकर्षिणि गन्धाकर्षिणि चित्ताकर्षिणि स्मृत्याकर्षिणि नामाकर्षिणि बीजाकर्षिणि आत्माकर्षिणि अमृताकर्षिणि शरीराकर्षिणि गुप्तयोगिनी सर्वाशापरिपूरकचक्रस्वामिन अनंगकुसुमे अनंगमेखले अनङ्गमादिनि अनंगमदनातुरेऽनङ्गरेखेऽनंगवेगिन्यनंगांकुशेऽनंगमलिनि गुप्ततरयोगिनि वैदिकदर्शनांगि सर्वसंक्षोभकारक चक्रस्वामिनि पूर्वाम्नायाधिदेवते सृष्टिरूपे सर्वसंक्षोभिणि सर्वविद्राविणि सर्वाकर्षिणि सर्वाह्लदिनि सर्वस्तंभिनि सर्वजृंभिणि सर्ववशङ्करि सर्वरंजिनि सर्वोन्मादिनि सर्वार्थसाधिके सर्वसंपत्प्रपूरिणि सर्वमंत्रमयि सर्वद्वंद्वक्षयकरि सम्प्रदाययोगिनि सौरदर्शनांगि सर्वसौभाग्यदायकचक्रे सर्वसिद्धिप्रदे सर्वसम्पत्प्रदे सर्वाप्रियङ्करि सर्वमङ्गलकारिणि सर्वकामप्रदे सर्वद:खविमोचिनी सर्वमृत्युप्रशमिनि सर्वविघ्ननिवारिणी सर्वांगसुन्दरि सर्वसौभाग्यदयिनि कुलोत्तर्णयोगिनि सर्वार्थसाधकचक्रेशि सर्वज्ञे सर्वशक्ते सर्वैश्वर्यफलप्रदे सर्वज्ञानमयि सर्वव्याधिनिवारिणि सर्वाधारस्वरूपे सर्वपापहरे सर्वानन्दमयि सर्वरक्षारूपिणि सर्वेप्सितफलप्रदे नियोगिनि वैष्णवदर्शनांगि सर्वरक्षाकरचक्रस्थे दक्षिणाम्नायेशि स्थितिरूपे वशिनि कामेशि मोदिनि विमले अरुणे जयिनि सर्वेश्वरि कौलिनि रहस्ययोगिनि रहस्यभोगिनि रहस्यगोपिनि शाक्तदर्शनांगि सर्वरोगहरचक्रेशि पश्चिमाम्नाये धनुर्बाणपाशांकुशदेवते कामेशि वज्रेशि भगमालिनि अतिरहस्ययोगिनि शैवदर्शनांगि सर्वसिद्धिप्रदचक्रगे उत्तराम्नायेशि संहाररूपे शुद्धपरे बिंदुपीठगते महात्रिपुरसुन्दरि परापरातिरहस्ययोगिनि शांभवदर्शनांगि सर्वानन्दमयचक्रेशि त्रिपुरसुंदरि त्रिपुरवासिनि त्रिपुरश्रीः त्रिपुरमालिनि त्रिपुरसिद्धे त्रिपुरांब सर्वचक्रस्थे अनुत्तराम्नायाख्यस्वरूपे महात्रिपुरभैरवि चतुर्विधगुणरूपे कुले अकुले कुलाकुले महाकौलिनि सर्वोत्तरे सर्वदर्शनांगि नवासनस्थिते नवाक्षरि नवमिथुनाकृते महेशमाधवविधातृमन्मथस्कन्दनन्दीन्द्र-

मनुचंद्रकुबेरागस्त्यदुर्वासः क्रोध भट्टारकवित्मिके कल्याणतत्वत्रयरूपे शिवशिवात्मिके पूर्णब्रह्मशक्ते महापरमेश्वरि महात्रिपुरसुन्दरि तव श्रीपादुकां पुजयामि नमः।। क एं ईल ह्रीं हस कहल ह्रीं सकल ह्रीं ऐं क्लीं सौः सौः क्लींऐं श्रीं।।

INITIATION PROCEDURE

देव्याः पुष्पांजलिं दद्यात्सस्त्राक्षरविद्यया।।
नोचेत्तत्पूजनं व्यर्थमित्याहुर्वेदवादिनः।।१५।।

ततो गोमयसंलिप्ते भूतले द्रोणशालिभिः।।
तावद्भिस्तण्डुलैः शुद्धैः शस्तार्णैस्तत्र नूतनम्।।१६।।

द्रोणोदपूरितं कुंभं पञ्चरत्नैर्नवैयुतम्।।
न्यग्रोधाश्वत्थमाकंदजंबूदुम्बरशखिनाम्।।१७।।

त्वग्भिश्च पल्लवैश्चैव प्रक्षिप्तैरधिवासिनम्।।
कुम्भाग्रे निक्षिपेत्पक्कं नारिकेलफलं शुभम्।।१८।।

अभ्यर्च्य गंधपुष्पाद्यैर्धूपदीपादि दर्शयेत्।।२०।।

शिष्यमाहूय रहसि वाससा बद्धलोचनम्।।
कारयित्वा प्रणामानां साष्टांगानां त्रयं गुरुः।।२१।।

पुष्पाणि तत्करे दत्वा कारयेत्कुसुमाञ्जलिम्।।
श्रीनाथकरुणाराशे परंज्योतिर्मयेश्वरि।।२२।।

प्रसूनांजलिरेषा ते निक्षिप्ता चरणांबुजे।।
परं धाम परं ब्रह्म मम त्वं परदेवता।।२३।।

अद्यप्रभृति मे पुत्रान्रक्ष मां शरणागतम्।।
इत्युक्त्वा गुरुपादाब्जे शिष्यो मूर्ध्नि विधारयेत्।।२४।।

जन्मान्तरसुकृतत्वं स्यान्न्यस्ते शिरसि पादुके।।
गुरुणा कमलासनमुरशासनपुरशासनसेवया लब्धे।।२५।।

इत्युक्त्वा भक्तिभरितः पुनरुत्थाय शांतिमान्।।
वामपार्श्वे गुरोस्तिष्ठेदमानी विनयान्वितः।।२६।।

ततस्तुंबीजलैः प्रोक्ष्य वामभागे निवेदयेत्।।
विमुच्य नेत्रबंध तु दर्शयेदर्चनक्रमम्।।२७।।

सितामध्वाज्यकदलीफलपायसरूपकम्।।
महात्रिपुरसुन्दर्या नैवेद्यमिति चादिशेत्।।२८।।

षोडशार्णमनुं तस्य वदेद्वामश्रुतौ शनैः।।
ततो बहिर्विनिर्गत्य स्थाप्य दार्वासने शुचिम्।।२९।।

निवेश्य प्राङ्मुखं तत्र पट्टवस्त्रसमास्तृते।।
शिष्यं श्रीकुम्भसलिलैरभिषिंचेत्समंत्रकम्।।३०।।

पुनः शुद्धोदकैः स्नात्वां वासांसि परिगृह्य च।।
अष्टोत्तरशतं मन्त्रं जप्त्वा निद्रामथाविशेत्।।३१।।

शुभे दृष्टे सति स्वप्ने पुण्यं योज्यं तदोत्तमम्।।
दुःस्वप्ने तु जपं कुर्यादष्टोत्तरसहस्रकम्।।३२।।

कारयेत्त्रिपुरांबायाः सपर्या मुक्तमार्गतः।।
यदा न दृष्टः स्वप्नोऽपि तदा सिद्धिश्चिराद्भवेत्।।३३।।

स्वीकुर्यात्परया भक्त्या देवी शेषकलाधिकम्।।
सद्य एव स शिष्यः स्यात्पंक्तिपावनपावनः।।३४।।

शरीरमर्थं प्राणं च तस्मै श्रीगुरवे दिशेत्।।
तदधीनश्चरेन्नित्यं तद्वाक्यं नैव लघंयेत्।।३५।।

यः प्रसन्नः क्षणार्धेन मोक्षलक्ष्मीं प्रयच्छति।।
दुर्लभं तं विजानीयाद्गुरुं संसारतारकम्।।३६।।

गुकारस्यांधकारोऽर्थो रुकारस्तन्निरोधकः।।
अंधकारनिरोधित्वाद्गुरुरित्यभिधीयते।।३७।।

बोधरूपं गुरुं प्राप्य न गुर्वंतरमादिशेत्।।
गुरूक्तं परुषं वाक्यमाशिषं परिचिंतयेत्।।३८।।

लौकिकं वैदिकं वापि तथाध्यात्मिकमेव च।।
आददीत ततो ज्ञानं पूर्वं तमभिवादयेत्।।३९।।

CONTEMPLATION

एवं दीक्षात्रयं कृत्वा विधेयं बोधयेत्पुनः।।
गुरुभक्तिस्सदाचारस्तद्द्रोहस्तत्र पातकम्।।४०।।

तत्पदस्मरणं मुक्तिर्यावद्देहमयं क्रमः।।
यत्पापं समवाप्नोति गुर्वग्रेऽनृतभाषणात्।।४१।।

गोब्राह्मणवधं कृत्वा न तत्पापं समाश्रयेत्।।
ब्रह्मादिस्तंबपर्यतं यस्य मे गुरुसंततिः।।४२।।

तस्य मे सर्वपूज्यस्य को न पूज्यो महीतले।।
इति सर्वानुकूलो यः स शिष्यः परिकीर्तितः।।४३।।

शीलादिविमलानेकगुणसंपन्नभावनः।।
गुरशासनवर्तित्वाच्छिष्य इत्यभिधीयते।।४४।।

जपाच्छांतः पुनर्ध्यायेद्ध्यानाच्छांतः पुनर्जपेत्।।
जपध्यानादियुक्तस्य क्षिप्रं मन्त्रः प्रसिध्यति।।४५।।

यथा ध्यानस्य सामर्थ्यात्कीटोऽपि भ्रमरायते।।
तथा समाधिसामर्थ्याद्ब्रह्मीभूतो भवेन्नरः।।४६।।

यथा निलीयते काले प्रपञ्चो नैव दृश्यते।।
तथैव मीलयेन्नेत्रे एतद्ध्यानस्य लक्षणम्।।४७।।

विदिते तु परे तत्वे वर्णातीते ह्यविक्रिये।।
किंकरत्वं च गच्छंति मंत्रा मंत्राधिपैः सह।।४८।।

आत्मैक्यभावनिष्ठस्य या चेष्टा सा तु दर्शनम्।।
योगस्तप: स तन्मंत्रस्तद्धनं यन्निरीक्षणम्।।४९।।

देहाभिमाने गलिते विज्ञाते परमात्मनि।।
यत्र यत्र मनो याति तत्र तत्र समाधय:।।५०।।

य: पश्येत्सर्वगं शांतमानंदात्मानमद्वयम्।।
न तस्य किंचिदाप्तव्यं ज्ञातव्यंवावशिष्यते।।५१।।

पूजाकोटिसमं स्तोत्रं स्तोत्रकोटिसमो जप:।।
जपकोटिसमं ध्यानं ध्यानकोटिसमो लय:।।५२।।

Right conduct

देहो देवालय: प्रोक्तो जीव एव महेश्वर:।।
त्यजेदज्ञानं निर्माल्यं सोहंभावेन योजयेत्।।५३।।

तुषेण बद्धो व्रीहि: स्यात्तुषाभावे तु तंडुल:।।
पाशबद्ध: स्मृतो जीव: पाशमुक्तो महेश्वर:।।५४।।

आकाशै पक्षिजातीनां जलेषु जलचारिणाम्।।
यथा गतिर्न दृश्येत महावृत्तं महात्मनाम्।।५५।।

नित्यार्चनं दिवा कुर्याद्रात्रौ नैमित्तिकार्चनम्।।
उभयो: काम्यकर्मा स्यादिति शास्त्रस्य निश्चय:।।५६।।

कोटिकोटिमहादानात्कोटिमहाव्रतात्।।
कोटिकोटिमहायज्ञात्परा श्रीपादुकास्मृति:।।५७।।

ज्ञानतोऽज्ञानतो वापि यावद्देहस्य धारणम्।।
तावद्वर्णाश्राचार: कर्तव्य: कर्ममुक्तये।।५८।।

निर्गतं यद्गुरोर्वक्त्रात्सर्वं शास्त्रं तदुच्यते।।
निषिद्धमपि तत्कुर्याद्गुर्वाज्ञां नैव लंघयेत्।।५९।।

जातिविद्याधनाढ्यो वा दूरे दृष्ट्वा नरं मुदा।।
दंडप्रणामं कृत्वैकं त्रिःप्रदक्षिणमाचारेत्।।६०।।

गुरुबुद्धया नमेत्सर्वं दैवतं तृणमेव वा।।
प्रणमेद्देवबुद्धया तु प्रतिमां लोहमृन्मयीम्।।६१।।

गुरुं हुंकृत्य तुंकृत्य विप्रं वादैर्विजित्य च।।
विकासस्य गुह्यशास्त्राणि भवति ब्रह्मराक्षसाः।।६२।।

अद्वैतं भावयेन्नित्यं नाद्वैतं गुरुणा सह।।
न निंदेदन्यसमयान्वेदशास्त्रगमादिकान्।।६३।।

एकाग्रमास्थितः शिष्यस्त्रिसंध्यं प्रणमेद्गुरुम्।।
क्रोशमात्रस्थितो भक्त्या गुरुं प्रतिदिनं नमेत्।।६४।।

अर्थयोजनगः शिष्यः प्रणमेत्पंचपर्वसु।
एकयोजनमारभ्य योजनद्वादशावधि।।६५।।

तत्तद्योजनसंख्यातमासेषु प्रणमेद्गुरुम्।।
अतिदूरस्थितः शिष्यो यदिच्छा स्यात्तदा व्रजेत्।।६६।।

रिक्तपाणिस्तु नोपेयाद्राजानं देवतां गुरुम्।।
फलपुष्पांबरादीनि यथाशक्ति समर्पयेत्।।६७।।

मनुष्यचर्मणा बद्धः साक्षात्परशिवः स्वयम्।।
सच्छिष्यानुग्रहार्थाय गूढं पर्यटति क्षितौ।।६८।।

सद्भक्तरक्षणायैव निराकारोऽपि साकृतिः।।
शिवः कृपानिधिर्लोके संसारीव हि चेष्टते।।६९।।

अत्रिनेत्रः शिवः साक्षादचतुर्बाहुरच्युतः।।
अचतुर्वदनो ब्रह्मा श्रीगुरुः परिकीर्तितः।।७०।।

श्रीगुरुं परतत्त्वाख्यं तिष्ठंतं चक्षुरग्रतः।।
भाग्यहीना न पश्यंति सूर्यमन्धा इवोदितम्।।७१।।

उत्तमा तत्त्वचिंता स्याज्जपचिंता तु मध्यमा।।
अधमा शास्त्रचिंता स्याल्लोकचिंतास्त्वधमाधमा।।७२।।

नास्ति गुर्वधिकं तत्त्वं नास्ति ज्ञानाधिकं सुखम्।।
नास्ति भक्त्यधिका पूजा न हि मोक्षाधिकं फलम्।।७३।।

सर्ववेदेषु शास्त्रेषु ब्रह्मविष्णुशिवादिषु।।
तत्र तत्रोच्यते शब्दैः श्रीकामाक्षी परात्परा।।७४।।

शचींद्रौ रोहिणीचंद्रौ स्वाहाग्नी च प्रभारवी।।
लक्ष्मीनारायणौ वाणीधातारौ गिरिजाशिवौ।।७५।।

अग्नीषोमौ बिंदुनादौ तथा प्रकृतिपूरुषौ।।
आधाराधेयनामानौ भोगमोक्षौ तथैव च।।७६।।

प्राणपानौ च शब्दार्थौ तथा विधिनिषेधकौ।।
सुखदःखादि यद्द्वंद्वं दृश्यते श्रूयतेऽपि वा।।७७।।

सर्वलोकेषु तत्सर्वं परं ब्रह्म न संशयः।।
उत्तीर्णमपरं ज्योतिः कामाक्षीनामकं विदुः।।७८।।

यदेव नित्यं ध्यायंति ब्रह्मविष्णुशिवादयः।।
इत्थं हि शक्तिमार्गेऽस्मिन्यः पुमानिह वर्तते।।७९।।

प्रसादभूमिः श्रीदेव्या भुक्तिमुक्त्योः स भाजनम्।।
अमन्त्रं वा समंत्रं वा कामाक्षीमर्चयंति ये।।८०।।

स्त्रियो वैश्याश्च शूद्राश्च ते यांति परमां गतिम्।।
किं पुनः क्षत्रिया विप्रा मंत्रपूर्वं यजंति ये।।८१।।

संसारिणोऽपि ते नूनं विमुक्ता नात्र संशयः।।
सितामध्वाज्यकदलीफलपायसरूपकम्।।८२।।

पञ्चपर्वसु नैवेद्यं सर्वदैव निवेदयेत्।।
यो नार्चयति शक्तोऽपि स देवीशापमाप्नुयात्।।७३।।

अशक्तौ भावनाद्रव्यैरर्चयेन्नित्यमंबिकाम्।।
गृहस्थस्तु महादेवीं मंगलाचारंसयुतः।।८४।।

अर्चयेत महालक्ष्मीमनुकूलांगनासखः।।
गुरुस्त्रिवारमाचारं कथयेत्कलशोद्भव।।८५।।

शिष्यो यदि य गृह्णीयाच्छिष्ये पापं गुरोर्न हि।।
लक्ष्मीनारायणौ वाणीधातारौ गिरिजाशिवौ।।८६।।

श्रीगुरुं गुरुपत्नीं च पितरौ चिंतयेद्धिया।।
इति सर्व।: मया प्रोक्तं समासेन घटोद्भव।।८७।।

एतावदवधानेन सर्वज्ञो मतिमान्भवेत्।।८८।।

CONSECRATION : ĀSANA AND NYĀSA

ग्रीव उवाच।।

प्रविश्य तु जपस्थानमानीय निजमासनम्।।
अभ्युक्ष्य विधिवन्मंत्रैर्गुरूक्तक्रमयोगतः।।१।।

स्वात्मानं देवातामूर्तिं ध्यायंस्तत्राविशेषतः।।
प्राङ्भुखो दृढमाबध्य पद्मासनमनन्यधीः।।२।।

त्रिखण्डामनुबध्नीयाद्दुर्वादीनभिवंद्य च।।
द्विरुक्तबालबीजानि मध्याद्यंगुलिषु क्रमात्।।३।।

तलयोरपि विन्यस्य करशुद्धिपुरःसरम्।।
अग्निप्राकारपर्यंतं कुर्यात्स्वास्त्रेण मन्त्रवित्।।४।।

प्रतिलोमेन पादाद्यमनुलोमेन कादिकम्।।
व्यापकन्यासमारोप्य व्यापयन्वाग्भवादिभिः।।५।।

व्यक्तैः कारणसूक्ष्मस्थूलशरीराणि कल्पयेत्।।
नाभौ हृदि भ्रुवोर्मध्ये बालाबीजान्यथ न्यसेत्।।६।।

मातृकां मूलपुटितां न्यसेन्नाभ्यादिषु क्रमात्।।
बालाबीजानि तान्येव द्विरावृत्याथ विन्यसेत्।।७।।

मध्यादिकरशाखासु तलयोरपि नान्यथा।।
नाभ्यादावथ विन्यस्य न्यसेदथ पदद्वये।।८।।

जानूरुस्फिग्गुह्यमूलनाभिहृन्मुर्धसु क्रमात्।।
नवासनानि ब्रह्माणं विष्णुं रुद्रं तथेश्वरम्।।९।।

सदाशिवं च पूषाणं तूलिकां च प्रकाशकम्।।
विद्यासनं च विन्यस्य हृदये दर्शयेत्ततः।।१०।।

पद्मत्रिखण्डयोन्याख्यां मुद्रामोष्ठपुटेन च।।
वायुमापूर्य हुं हुं हुं त्विति प्रबोध्य कुण्डलीम्।।११।।

मन्त्रशक्त्या समुन्नीय द्वादशान्ते शिवकैकताम्।।
भावयित्वा पुनस्तं च स्वस्थाने विनिवेश्य च।।१२।।

वाग्भवादीनि बीजानि मूलहृद्वाहुषु न्यसेत्।।
समस्तमूर्ध्निदोर्मूलमध्याग्रेषु यथाक्रमम्।।१३।।

हस्तौ विन्यस्य चांगेषु ह्यङ्गुष्टादितलावधि।।
हृदयादौ च विन्यस्य कुंकुमं न्यासमाचरेत्।।१४।।

शुद्धा तृतीयबीजेन पुटितां मातृकां पुनः।।
आद्यबीजद्वयं न्यस्य ह्यंत्यबीजं न्यसेदिति।।१५।।

पुनर्भूतलविन्यासमाचरेन्नातिविस्तरम्।।
वर्गाष्टकं न्यसेन्मूले नाभौ हृदयकण्ठयोः।।१६।।

प्रागाधायैषु शषसान्मूलहृन्मूर्द्धसु न्यसेत्।।
कक्षकट्यंसवामांसंकटिहृत्सु च विन्यसेत्।।१७।।

प्रभूताधः षडंगानि दादिवर्गैस्तु विन्यसेत्।।
ऋषिस्तु शब्दब्रह्म स्याच्छंदो भूतलिपिर्मता।।१८।।

श्रीमूलप्रकृतिस्त्वस्य देवता कथिता मनोः।।
अक्षस्त्रक्पुस्तके चोर्ध्वे पुष्पसायककार्मुके।।१९।।

वराभीतिकराब्जैश्च धारयंतीमनूपमाम्।।
रक्षणाक्षमयीं मालां वहन्ती कण्ठदेशतः।।२०।।

हारकेयूरकटकच्छन्नवीरविभूषिणाम्।।
दिव्यांगरागसंभिन्नमणिकुंण्डलमण्डिताम्।।२१।।

लिपिकल्पद्रुमस्याधो रूपिपंकजवासिनीम्।।
साक्षाल्लिपिमयीं ध्यायेद्भैरवीं भक्तवत्सलाम्।।२२।।

अनेककोटिदूतीभिः समंतात्समलंकृताम्।।
एवं ध्यात्वा न्यसेद्भूयो भूतलेप्यक्षरान्क्रमात्।।२३।।

मूलाद्याज्ञावसानेषु वर्गाष्टकमथो न्यसेत्।।
शषसान्मूर्ध्नि संन्यस्य स्वरानेष्वेव विन्यसेत्।।२४।।

हादिरूर्ध्वादिपञ्चास्येष्वग्रे मूले च मध्यमे।।
अङ्गुली मूलमणिबन्धयोर्दोष्णोश्च पादयोः।।२५।।

जठरे पाश्वयोर्दक्षवामयोर्नाभिपृष्ठयोः।।
शषसान्मूलहृन्मूर्धस्वेतान्वा लादिकान्न्यसेत्।।२६।।

ह्रस्वाः पञ्चाथ सन्ध्यर्णाश्चत्वारो हयरा वलौ।।
अकौ खगेनगश्चादौ क्रमोयं शिष्टवर्गके।।२७।।

शषसा इति विख्याता द्विचत्वारिंशदक्षराः।।
आद्यः पञ्चाक्षरो वर्गा द्वितीयश्चतुरक्षरः।।२८।।

पञ्चाक्षरी तु षङ्वर्गी त्रिवर्णो नवमो मतः।।
ब्रह्मा विष्णुश्च रुद्रश्च धनेशेंद्रयमाः क्रमात्।।२९।।

वरुणश्चैव सोमश्च शक्तित्रयमिमे नव।।
वर्णानामीश्वराः प्रोक्ताः क्रमो भूतलिपरेयम्।।३०।।

एवं सृष्टौ पाठो विपरीतः संहृतावमून्येव।।
स्थानानि योजनीयौ विसर्गबिंदू च वर्णांतौ।।३१।।

ध्यानपूर्वं ततः प्राज्ञो रत्यादिन्यासमाचरेत्।।
जपाकुसुमसंकाशाः कुंकुमारुणविग्रहाः।।३२।।

कामवामाधिरूढांका ध्येयाः शरधनुर्धराः।।
रतिप्रीतियुतः कामः कामिन्याः कांत इष्यते।।३३।।

कांतिमान्मोहिनीयुक्तकामांगः कलहप्रियाम्।।
अन्वेति कामचारैस्तु विलासिन्या समन्वितः।।३४।।

कामः कल्पतलायुक्तः कामुकः श्यामवर्णया।।
शुचिस्मितान्वितः कामो बंधको विस्मृतायुतः।।३५।।

रमणो विस्मिताक्ष्या च रामोऽयं लेलिहानया।।
रमण्या रतिनाथेपि दिग्वस्त्रढ्यो रतिप्रिया।।३६।।

वामया कुब्जया युक्तो रतिनाथो धरायुतः।।
रमाकांतो रमोपास्यो रममाणो निश्चारः।।३७।।

कल्याणो मोहिनीनाथो नन्दकश्चोत्तमान्वितः।।
नन्दी सुरोत्तमाढ्यो नन्दनो नन्दयिता पुनः।।३८।।

सुलावण्यान्वितः पंचबाणो बालनिधीश्वरः।।
कलहप्रियया युक्तस्तथा रतिसखः पुनः।।३९।।

एकाक्ष्या पुष्पधन्वापि सुमुखेशो महाधनुः।।
नीली जटिल्यो भ्रमणः क्रमशः पालिनीपतिः।।४०।।

भ्रममाणः शिवाकांतो भ्रमो भ्रान्तश्च मुग्धया।।
भ्रामको रमयो प्राप्तो भ्रामितो भृङ्ग इष्यते।।४१।।

भ्रांताचारो लोचनया दीर्घजिह्विकया पुनः।।
भ्रमावहं समन्वेति मोहनस्तु रतिप्रियाम्।।४२।।

मोहकस्तु पलाशाक्ष्य। गृहिण्या मोह इष्यते।।
विकटेशो मोहधरो वर्धनोयं धरायुत:।।४३।।

मदनाथोऽनूपमस्तु मन्मथो मलयान्वित:।।
मादकोह्लादिनीयुक्त: समिच्छन्विश्वतोमुखी।।४४।।

नायको भृंगपूर्वस्तु गायको नंदिनीयुत:।।
गणकोऽनामया ज्ञेय: काल्या नर्तक इष्यते।।४५।।

क्ष्वेल्लक: कालकर्ण्याढ्य: कंदर्पो मत्त इष्यते।।
नर्तक: श्यामलाकांतो विलासी झषयान्वित:।।४६।।

उन्मत्तामुपसंगम्य मोदते कामवर्धन:।।
ध्यानपूर्वं तत: श्रीकण्ठादिविन्यासमाचरेत्।।४७।।

सिंदूरकांचनसमोभयभागमर्धनारीश्वरं गिरिसुताहरभूपचिह्नम्।।
पाशद्वयाक्षवलयेष्टदहस्तमेव स्मृत्वा न्यसेल्लिपिपदषु समीहितार्थम्।।४८।।

SHODHĀ-NYĀSA

श्रीकंठानंतसूक्ष्मौ च त्रिमूर्तिरमेश्वर:।।
उर्वीशो भारभूतिश्चातिथीश: स्थाणुको हर:।।४९।।

चण्डीशो भौतिक: सद्योजातश्चानुग्रहेश्वर:।।
अक्रूरश्च महासेन: स्युरेते वरमूर्त्तय:।।५०।।

तत: क्रोधीशचण्डीशौ पञ्चांतशिवोत्तमौ।।
तथैकरुद्रकूर्मैकनेत्रा: सचतुरातना:।।५१।।

अजेश: सर्वसोमेशौ हरो लांगलिदारुकौ।।
अर्धनारीश्वरश्चोमाकांतश्चापाढ्यदंडिनौ।।५२।।

अत्रिर्मीनश्च मेषश्च लोहितश्च शिखी तथा।।
खड्गदंडद्विदंडौ च सुमहकालव्यालिनौ।।५३।।

भुजंगेशः पिनाकी च खड्गेशश्च बकस्तथा।।
श्वेतोह्यमश्च लकुलीशिवः संवर्तकस्तथा।।५४।।

पूर्णोदरी च विरजा तृतीया शाल्मली तथा।।
लोलाक्षी वर्तुलाक्षी च दीर्घघोण तथैव च।।५५।।

सुदीर्घखिगो मुख्यौ नवमी दीर्घजिह्विका।।
कुञ्जरीचोर्ध्वकेशा च द्विमुखी विकृतानना।।५६।।

सत्यलीलाकलाविद्यामुख्याः स्युः स्वरशक्तयः।।
महाकालीसरस्वत्यौ सर्वसिद्धिसमन्विते।।५७।।

गौरी त्रैलोक्यविद्या च तथा मंत्रात्मशक्तिका।।
लंबोदरी भूतमाता द्राविणी नागरी तथा।।५८।।

खेचरी मञ्जरी चैव रूपिणी वारिणी तथा।।
कोटरा पूतना भद्रा काली योगिन्य एव च।।५९।।

शंखिनीगर्जिनीकालरात्रिकूर्दिन्य एव च।।
कपर्दिनी तथा वज्रा जया च सुमुखेश्वरी।।६०।।

रेवती माधवी चैव वारुणी वायवी तथा।।
रक्षावधारिणी चान्या तथा च सहजाह्वया।।६१।।

लक्ष्मीश्च व्यापिनीमाये संख्याता वर्णशक्तयः।।
द्विरुक्तवालाया वर्णै रंगं कृत्वाथ केवलैः।।६२।।

षोढान्यासं प्रकुर्वीत देवतात्मत्वसिद्धये।।
विघ्नेशादीस्तु तत्रादौ विन्यसेद्ध्यानपूर्वकम्।।६३।।

तरुणाऽरुणसंकाशान्गजवक्त्रांस्त्रिलोचनान्।।
पाशांकुशवराभीतिहस्ताञ्छक्तिसमन्वितान्।।६४।।

विघ्नेशो विघ्नराजश्च विनायकशिवोत्तमौ।।
विघ्नकृद्विघ्नहन्ता च विघ्नराड्गणनायकः।।६५।।

एकदन्तो द्विदन्तश्च गजवक्त्रो निरञ्जनः।।
कपर्दवान्दीर्घमुखः शंकुकर्णो वृषध्वजः।।६६।।

गणनाथो गजेन्द्रास्यः शूर्पकर्णास्त्रिलोचनः।।
लम्बोदरो महानादश्चतुर्मूर्तिः सदाशिवः।।६७।।

आमोदो दुर्मदश्चैव सुमुखश्च प्रमोदकः।।
एकपादो द्विपादश्च शूरो वीरश्च षण्मुखः।।६८।।

वरदो नाम देवश्च वक्रतुण्डो द्विदन्तकः।।
सेनानीर्ग्रामणीर्मत्तो मत्तमूषकवाहनः।।६९।।

जटी मुण्डी तथा खड्गी वरेण्यो वृषकेतनः।।
भक्ष्यप्रियो गणेशश्च मेघनादो गणेश्वरः।।७०।।

एते गणेशा वर्णानामेकपञ्चाशतः क्रमात्।।
श्रीश्च ह्रीश्चैव पुष्टिश्च शांतिस्तुष्टिः सरस्वती।।७१।।

रतिर्मेधा तथा कांति कामिनी मोहिनी तथा।।
तीव्रा च ज्वालिनी नंदा सुयशाः कामरूपिणी।।७२।।

उग्रा तेजोवती सत्यविघ्नेशानी स्वरूपिणी।।
कामार्त्ता मदजिह्वा च विकटा घूर्णितानना।।७३।।

भूतिर्भूमिर्द्विरस्या चामारूपा मकरध्वजा।।
विकर्णभ्रुकुटी लज्जा दीर्घघोणा धनुर्धरी।।७४।।

तथैव यामिनी रात्रिश्चंद्रकांतां शशिप्रभा।।
लोलाक्षी चपला ऋज्वी दुर्भगा सुभगा शिवा।।७५।।

दुर्गा गुहप्रिया काली कालजिह्वा च शक्तयः।।
ग्रहन्यासं ततः कुर्याद्ध्यानपूर्वं समाहितः।।७६।।

वरदाभयहस्ताढ्याञ्छक्त्यालिंगितविग्रहान्।।
कुंकुमक्षीररुधिरकुंदकांचनकंबुभिः।।७७।।

अम्भोदधूमतिमिरैः सूर्यादीन्सदृशान्स्मरेत्।।
हृदयाधो रविं न्यस्य शीर्ष्णि सोमं दृशोः कुजम्।।७८।।

हृदि शुक्रं च हृन्मध्ये बुधं कण्ठे वृहस्पतिम्।।
नाभौ शनैश्चरं वक्त्रे राहुं केतुं पदद्वये।।७९।।

ज्वलत्कालानलप्रख्यावरदाभयपाणयः।।
तारा न्यसेत्ततो ध्यायन्सर्वाभरणभूषिताः।।८०।।

भाले नयनयोः कर्णद्वये नासापुटद्वये।।
कण्ठे स्कन्धद्वये पश्चात्कूर्परयोर्मणिबन्धयोः।।८१।।

स्तनयोर्नाभिकट्यूरुजानुजङ्धापदद्वये।।
योगिनीन्यासमादध्याद्विशुद्धो हृदये तथा।।८२।।

नाभौ स्वाधिष्ठिते मूले भ्रूमध्ये मूर्धनि क्रमात्।।
पद्मेदुकर्णिकामध्ये वर्णशक्तीर्दलेष्वथ।।८३।।

दलाग्रेषु तु पद्मस्य मूर्ध्नि सर्वाश्च विन्यसेत्।।
अमृता नंदिनीन्द्राणी त्वीशानी चात्युमा तथा।।८४।।

ऊर्ध्वकेशी ऋद्धिदुषी ऌकारिका तथैव च।।
एकपादात्मिकैश्वर्यकारिणी चौपधात्मिका।।८५।।

ततोंबिकाथो रक्षात्मिकेति षोडश शक्तयः।।
कालिका खेचरी गायत्री घण्टाधारिणी तथा।।८६।।

नादात्मिका च चामुण्डा छत्रिका च जया तथा।।
झङ्कारिणी च संज्ञा च टंकहस्ता ततः परम्।।८७।।

टंकारिणी च विज्ञेयाः शक्तयो द्वादशा क्रमात्।।
डंकारी टंकारिणी चणामिनी तामसी तथा।।८८।।

थंकारिणी दया धात्री नादिनी पार्वती तथा।।
फट्कारिणी च विज्ञेयाः शक्तयो द्वयपन्नगाः।।८९।।

वर्धिनी च तथा भद्रा मज्जा चैव यशस्विनी।।
रमा च लामिनी चेति षडेता: शक्तय: क्रमात्।।९०।।

नारदा श्रीस्तदा षंढाशश्वत्यपि च शक्तय:।।
चतस्रोऽपि तथैव द्वे हाकिनी च क्षमा तथा।।९१।।

तत: पादे च लिंगे च कुक्षौ हृद्दो:शिरस्सु च।।
दक्षादिवामपादान्तं राशीन्मेषादिकान्न्यसेत्।।९२।।

तत: पीठानि पञ्चाशदेकं चक्रं मनो न्यसेत्।।
वाराणसी कामरूपं नेपालं पौण्ड्रवर्धनम्।।९३।।

वरस्थिरं कान्यकुब्जं पूर्णशैलं तथार्बुदम्।।
आम्रातकेश्वरैकाम्रं त्रिस्रोत: कामकोष्ठकम्।।९४।।

कैलासं भृगुनगरं केदारं चन्द्रपुष्करम्।।
श्रीपीठं चैकवीरां च जालन्ध्रं मालवं तथा।।९५।।

कुलान्नं देविकोटं च गोकर्णं मारुतेश्वरम्।।
अट्टहासं च विरजं राजवेश्म महापथम्।।९६।।

कोलापुरकैलापुरकालेश्वरजयन्तिका:।।
उज्जयिन्यपि चित्रा च क्षीरकं हस्तिनापुरम्।।९७।।

उडीरां च प्रयागं च षष्टिमायापुरं तथा।।
गौरीशं सलयं चैव श्रीशैलं मरुमेव च।।९८।।

पुनर्गिरिवरं पश्चान्महेन्द्रंवामनं गिरिम्।।
स्याद्धिरण्यपुरं पश्चान्महालक्ष्मीपुरं तथा।।९९।।

पुरोद्यानं तथा छायाक्षेत्रमाहुर्ननीषिण:।।
लिपिक्रमसमायुक्ताँल्लिपिस्थानेषु विन्यसेत्।।१००।।

अन्यान्यथोक्तस्थानेषु संयुक्ताँल्लिपिसङ्क्रमात्।।
षोढा न्यासो मयाख्यात: साक्षादीश्वरभाषित:।।१०१।।

एवं विन्यस्तदेहस्तुं देवताविग्रहो भवेत्।।
तत: षोढा पुर: कृत्वा श्रीचक्रन्यासमाचरेत्।।१०२।।

अंशाद्यानन्द्यमूर्त्यन्तं मन्त्रैस्तु व्यापकं चरेत्।।
चक्रेश्वरी चक्रसमर्पणमन्त्रान्हृदि न्यसेत्।।१०३।।

अन्यान्यथोक्तस्थानेषु गणपत्यादिकान्न्यसेत्।।
दक्षिणोरुसमं वामं सर्वांश्च क्रमशो न्यसेत्।।१०४।।

गणेशं क्षेत्रपालं च योगिनीं बटुकं तथा।।
आदाविन्द्रादयो न्यस्या: पदाङ्गुष्ठद्वया ग्रके।।१०५।।

जानुपार्श्वासमूर्धास्यपार्श्वजानुषु मूर्धनि।।
मूलाधारेऽणिमादीनां सिद्धीनां दशकं तत:।।१०६।।

न्यस्तव्यंमदसदो: पृष्टवक्षस्तु प्रपदो: स्फिजि।।
दोर्देशपृष्ठयोर्मूर्धपादद्वितययो: क्रमात्।।१०७।।

अणिमा चैव लधिमा तृतीया महिमा तथा।।
ईशित्वं च वशित्वं च प्राकाभ्यं प्राप्तिरेव च।।
इच्छासिद्धी रससिद्धिर्मोक्षसिद्धिरिति स्मृता:।।१०८।।

ततो विप्र न्यसेद्धीमान्मातृणामष्टकं क्रमात्।।
पादाङ्गष्टयुगे दक्षपार्श्वे मूर्द्धनि वामत:।।१०९।।

वामजनौ दक्षजानौ दक्षवामांसयो स्तथा।।११०।।

ब्राह्मी माहेश्वरी चैव कौमारी वैष्णवी तथा।।
वारही च तथेन्द्रणी चामुण्डा चैव सप्तमी।।१११।।

महालक्ष्मीश्च विज्ञेया मातरो वै क्रमाद् बुधै:।।
मुद्रादेवीर्न्यसेदाष्टावेष्टवेव द्वे च ते पुन:।।११२।।

मूर्द्धांध्योरपि मुद्रास्तु सर्वसंक्षोभिणी तथा।।
सर्वविद्राविणी पश्चात्सर्वार्थाकर्षणी तथा।।११३।।

सर्वाद्या वशकरिणी सर्वाद्या प्रियकारिणी।।
महाङ्कुशी च सर्वाद्या सर्वाद्याश्चेचरी तथा।।११४।।

त्रिखण्डा सर्वबीजा च मुद्रा सर्वप्रपुरिका।।
योनिमुद्रेति विज्ञेयास्तत्र चक्रेश्वरीं न्यसेत्।।११५।।

त्रैलोक्यमोहन चक्रं समर्प्य व्याप्य वर्ष्मणि।।
ततः कलानां नित्यानां क्रमात्षोडशकं न्यसेत्।।११६।।

कामाकर्षणरूपा च शब्दाकर्षणरूपिणी।।
अहंकाराकर्षिणी च शद्धकर्षणरूपिणी।।
स्पर्शाकर्षणरूपा च रुपाकर्षणरूपिणी।।
रसाकर्षरूपा च गन्धा कर्षणरूपिणी।।१९७।।

चित्ताकर्षणरूपा च धैर्याकर्षरूपिणी
स्मृत्याकर्षणरूपा च हृदाकर्षणरूपिणी।।११९।।

श्रद्धाकर्षणरूपा च ह्यात्माकर्षणरूपिणी।।
अमृताकर्षिणी प्रोक्ता शरीराकर्षिणी तथा।।१२०।।

स्थानानि दक्षिणं श्रोत्रं पृष्ठमंसश्च कूर्परः।।
दक्षहस्ततलस्याथ पृष्टं तत्स्फिक्चं जानुनी।।१२१।।

तज्जंघाप्रपदे वामप्रपददिविलोमतः।।
चक्रेशीं न्यस्य चक्रं च समर्च्य व्याप्य वर्ष्मणि।।१२२।।

न्यसेदनंगकुसुमदेव्यादीनामथाष्टकम्।।
शंखजत्रुरुजङधासु वामे तु प्रतिलोमतः।।१२३।।

अनङ्गकुसमा पश्चाद्दितीयानंगमेखला।।
अनंगमदना पश्चादनंगमदनातुरा।।१२४।।

अनंगरेखा तत्पश्चाद्वेगाख्यानंगपूर्विका।।
ततोऽनंगांकुशा पश्चादनंगाधारमालिनी।।१२५।।

चक्रेशीं न्यस्य चक्रं च समर्प्य व्याप्य वर्ष्मणि।।
शक्तिदेवीर्न्यसेत्सर्वसंक्षोभिण्यादिका अथ।।१२६।।

ललाटगण्डयोरंसे पादमूले च जानुनि।।
उपर्यधश्च जंघायां तथा वामे विलोमतः।।१२७।।

सर्वसंक्षोभिणी शक्तिः सर्वविद्राविणी तथा।।
सर्वाद्याकर्षणी शक्तिः सर्वप्रह्लादिनी तथा।।१२८।।

सर्वसंमोहिनी शक्तिः सर्वाद्या स्तंभिनी तथा।।
सर्वाद्या ज्रंभिणी शक्तिः सर्वाद्यावशकारिणी।।१२९।।

सर्वाद्या रञ्जिनी शक्तिः सर्वाद्योन्मादिनी तथा।।
सर्वार्थसाधिनी शक्तिस्सर्वाशापूरिणी तथा।।१३०।।

सर्वमन्त्रमयी शक्तिः सर्वद्वन्द्वक्षयङ्करा।।
चक्रेशीं न्यस्य चक्रं च समर्प्य व्याप्य वर्ष्मणि।।१३१।।

सर्वसिद्धिप्रदादीनां दशकं चाथ विन्यसेत्।।
दक्षनासापुटे दंतमूले दक्षस्तने तथा।।१३२।।

कूर्परे मणिबन्धे च न्यस्येद्वामे विलोमतः।।
सर्वसिद्धिप्रदा नित्यं सर्वसंपत्प्रदा तथा।।१३३।।

सर्वप्रियंकरा देवी सर्वमङ्गलकारिणी।।
सर्वाघमोचिनी शक्तिः सर्वदुःखविमोचिनी।।१३४।।

सर्वमृत्युप्रशमिनी सर्वविघ्नविनाशिनी।।
सर्वांगसुन्दरी चैव सर्वसौभाग्यदायिनी।।१३५।।

चक्रेशीं न्यस्य चक्रं च समर्प्य व्याप्यवर्ष्मणि।।
सर्वज्ञाद्यान्न्यसेद्दक्षस्यपि दन्तस्थलेष्वथ।।१३६।।

सर्वज्ञा सर्वशक्तिश्च सर्वज्ञानप्रदा तथा।।
सर्वज्ञानमयी देवी सर्वव्याधिविनाशिनी।।१३७।।

सर्वाधारस्वरूपा च सर्वपापहरा तथा।।
सर्वानन्दमयी देवी सर्वरक्षास्वरूपिणी।।
विज्ञेया दशमी चैव सर्वेप्सितफलप्रदा।।१३८।।

चक्रेशीं न्यस्य चक्रं च समर्प्य व्याप्य वर्ष्मणि।।
प्राग्वामाद्याश्च विन्यस्य पक्षिण्याद्यास्ततः सुधीः।।१३९।।

दक्षे तु चिबुके कण्ठे स्तने नाभौ च पार्श्वयोः।।
वामा विनोदिनी विद्या वशिता कामिकी मता।।१४०।।

कामेश्वरी परा ज्ञेया मोहिनी विमला तथा।।
अरुणा जयिनी पश्चात्तथा सर्वेश्वरी मता।।
कौलिनीति समुक्तानि तासां नामानि सूरिभिः।।१४१।।

चक्रेश्वरी न्यसेच्चक्रं समर्प्य व्याप्य वर्ष्मणि।।
हृदि त्रिकोणं संभाव्य दिक्षु प्रागादितः क्रमात्।।१४२।।

तद्बहिर्विन्यसेद्धीमानायुधानां चतुष्टयम्।।
न्यसेदग्न्यादिकोणेषु मध्ये पीठचतुष्टयम्।।१४३।।

मध्यवृत्तंन्यसित्वा च नित्याषोडशकं न्यसेत्।।
कामेश्वरी तथा नित्या च भगमालिनी।।१४४।।

नित्याक्लिन्ना तथा नित्या नित्या भेरुण्डिनी मता।।
बह्निवासिनिका नित्या महावज्रेश्वरी तथा।।१४५।।

नित्या च दूती नित्या च त्वरिता तु ततः परम्।।
कुलसुन्दरिका नित्या कुल्या नित्या ततः परम्।।
नित्या नीलपताका च नित्या तु विजया परा।।
ततस्तु मङ्गला चैव नित्यपूर्वा प्रचक्ष्यते।।१४७।।

प्रभामालिनिका नित्या चित्रा नित्या तथैव च।।
एतास्त्रिकोणान्तरेण पादतो हृदि विन्यसेत्।।
नित्या प्रमोदिनी चैव नित्या त्रिपुरसुन्दरी।।
तन्मध्ये विन्यसेद्देवीमखण्डजगदात्मिकाम्।।१४९।।

चक्रेश्वरी हृदि न्यस्य कृत्वा चक्रं समुद्धतम्।।
प्रदर्श्य योन्याख्यां सर्वानन्दमनुं जपेत्।।
इत्यात्मनस्तु चक्रस्य चक्रदेवी भविष्यति।।१५०।।

॥ श्रीललिताष्टोत्तरशतनामावलिः ॥

ॐ रजताचल-श्रृंगारग्रमध्यस्थायै नमो नमः।

ॐ हिमाचल-महावंश-पावनायै नमो नमः।

ॐ शंकरार्धांग-सौन्दर्य-शरीरायै नमो नमः।

ॐ लसन्-मरकत-स्वच्छ-विग्रहायै नमो नमः।

ॐ यहातिशय-सौन्दर्य-लावण्यायै नमो नमः।

ॐ शशांकशेखर-प्राणवल्लभायै नमो नमः।

ॐ सदा-पंचदशात्मैक्य-स्वरूपायै नमो नमः।

ॐ वज्र-माणिक्य-कटक-किरीटायै नमो नमः।

ॐ कस्तूरी-तिलकोल्लास-निटिलायै नमो नमः।

ॐ भस्म-रेखांकित-लसन्-मस्तकायै नमो नमः।।१०।।

ॐ विकचांभोरुह-दल-लोचनायै नमो नमः।

ॐ शरच्चांपेय-पुष्पाभ-नासिकायै नमो नमः।

ॐ लसत्-कांचन-ताटंक-युगलायै नमो नमः।

ॐ मणि-दर्पण-संकाश-कपोलायै नमो नमः।

ॐ ताबूंल-पूरित-स्मरे-वदनायै नमो नमः।

ॐ सुपक्क-दाडिमी-बीज-रदनायै नमो नमः।

ॐ कंबु-पूग-समच्छाय-कन्धरायै नमो नमः।

ॐ स्थूल-मुक्ताफलोदार-सुहारायै नमो नमः।

ॐ गिरीश-बद्ध-मांगल्य-मंगलायै नमो नमः।

ॐ पद्म-पाशांकुश-लसत्-कराब्जायै नमो नमः।।२०।।

ॐ पद्म-कैरव-मन्दार-सुमालिन्यै नमो नमः।

ॐ सुवर्णकुंभ-युग्माभ-सुकुचायै नमो नमः।
ॐ रमणीय-चतुर्बाहु-संयुक्तायै नमो नमः।
ॐ कनकांगद-केयूर-भूषितायै नमो नमः।
ॐ बृहत्-सौवर्ण-सौन्दर्य-वसनायै नमो नमः।
ॐ बृहन्नितंब-विलसज्जघनायै नमो नमः।
ॐ सौभाग्य-जात-शृंगार-मध्यमायै नमो नमः।
ॐ दिव्य-भूषण-सन्दोह-रंजितायै नमो नमः।
ॐ पारिजात-गुणाधिक्य-पदाब्जायै नमो नमः।
ॐ सुपद्मराग-संकाश-चरणायै नमो नमः।।३०।।
ॐ कामकोटि-महापद्म-पीठस्थायै नमो नमः।
ॐ श्रीकण्ठ-नेत्र-कुमुद-चन्द्रिकायै नमो नमः।
ॐ सुचामर-रमा-वाणी-वीजितायै नमो नमः।
ॐ भक्त-रक्षण-दाक्षिण्य-कटाक्षायै नमो नमः।
ॐ भूतेशालिंगनोद्भूत-पुलकांग्यै नमो नमः।
ॐ अनंग-जनकापांगवीक्षणायै नमो नमः।
ॐ ब्रह्मोपेन्द्र-शिरोरत्न-रंजितायै नमो नमः।
ॐ शची-मुख्यमार-वधू-सेवितायै नमो नमः।
ॐ लीला-कल्पित-ब्रह्माण्ड-मण्डलायै नमो नमः।
ॐ अमृतादि-महाशक्ति-संवृतायै नमो नमः।।४०।।
ॐ एकातपत्र-साम्राज्य-दायिकायै नमो नमः।
ॐ सनकादि-समाराध्य-पादुकायै नमो नमः।
ॐ देवर्षिभिस्तूयमान-वैभवायै नमो नमः।
ॐ कलशोद्भव-दुर्वास-पूजितायै नमो नमः।
ॐ मत्तेभ-वक्त्र-षड्वक्त्र-वत्सलायै नमो नमः।
ॐ चक्रराज-महायंत्र-मध्यवर्तिन्यै नमो नमः।
ॐ चिदग्निकुण्ड-संभूत-सुदेहायै नमो नमः।

ॐ शशांक-खण्ड-संयुक्त-मुकुटायै नमो नमः।

ॐ मत्त-हंस-वधू-मन्दगमनायै नमो नमः।

ॐ वन्दारुजन-सन्दोह-वन्दितायै नमो नमः।।५०।।

ॐ अन्तर्मुख-जनानन्द-फलदायै नमो नमः।

ॐ प्रतिव्रतांगनाभीष्टफलदायै नमो नमः।

ॐ अव्याज-करुणा-पूर-पूरितायै नमो नमः।

ॐ नितान्त-सच्चिदानन्द-संयुक्तायै नमो नमः।

ॐ सहस्र-सूर्य-संयुक्त-प्रकाशायै नमो नमः।

ॐ रत्न-चिन्तामणि-गृहमध्यास्थायै नमो नमः।

ॐ हानि-वृद्धि-गुणधिक्य-रहितायै नमो नमः।

ॐ महापद्माटवी-मध्यनिवासायै नमो नमः।

ॐ जाग्रत्-स्वप्न-सुषुप्तीनां साक्षिभूत्यै नमो नमः।

ॐ महापापौघ-पापानां विनाशिन्यै नमो नमः।।६०।।

ॐ दुष्टभीति-महाभीति-भंजानायै नमो नमः।

ॐ समस्त-देव-दनुज-प्रेरकायै नमो नमः।

ॐ समस्त-हृदयांभोज-निलयायै नमो नमः।

ॐ अनाहत-महापद्म-मन्दिरायै नमो नमः।

ॐ सहस्रार-सरोजात-वासितायै नमो नमः।

ॐ पुनरावृत्तिरहित पुरस्थायै नमो नमः।

ॐ वाणी-गायत्री-सावित्री-सन्नुतायै नमो नमः।

ॐ रमा-भूमिसुताराध्य-पदाब्जायै नमो नमः।

ॐ लोपामुद्रार्चितश्रीमच्चरणायै नमो नमः।

ॐ सहस्र-रति-सौन्दर्य-शरीरायै नमो नमः।।७०।।

ॐ भावना-मात्र-सन्तुष्ट-हृदयायै नमो नमः।

ॐ सत्य-संपूर्ण-विज्ञान-सिद्धिदायै नमो नमः।

ॐ श्रीलोचन-कृतोल्लास-फलदायै नमो नमः।

ॐ श्रीसुधाब्धि-मणिद्वीप-मध्यगायै नमो नमः।
ॐ दक्षाध्वर-विनिर्भेद-साधनायै नमो नमः।
ॐ श्रीनाथ-सोदरीभूत-शोभितायै नमो नमः।
ॐ चन्द्रशेखर-भक्तार्ति-भंजनायै नमो नमः।
ॐ सर्वोपाधि-विनिर्मुक्त-चैतन्यायै नमो नमः।
ॐ नाम-पारायणाभीष्ट-फलदायै नमो नमः।
ॐ सृष्टि-स्थिति-तिरोधान-संकल्पायै नमो नमः।।८०।।
ॐ श्रीषोडशाक्षरीमन्त्रमध्यगायै नमो नमः।
ॐ अनाद्यन्त-स्वयंभूत-दिव्यमूर्त्यै नमो नमः।
ॐ भक्त-हंस-परित्राण-नियोगायै नमो नमः।
ॐ मातृ-मण्डल-संयुक्त-ललितायै नमो नमः।
ॐ भण्डदैत्य-महासत्व-नाशनायै नमो नमः।
ॐ क्रूर-भण्ड-शिरच्छेद-निपुणायै नमो नमः।
ॐ धाताच्युत-सुराधीश-सुखदायै नमो नमः।
ॐ चण्ड-मुण्ड-निशुंभादि-खण्डनायै नमो नमः।
ॐ रक्ताक्ष-रक्तजिह्वादि-शिक्षणायै नमो नमः।
ॐ महिषासुर-दोर्वीर्य-निग्रहायै नमो नमः।।९०।।
ॐ अभ्रकेश-महोत्साह-कारणायै नमो नमः।
ॐ महेश-युक्त-नटन-तत्परायै नमो नमः।
ॐ निजभर्तृ-मुखांभोज-चिन्तनायै नमो नमः।
ॐ वृषभध्वज-विज्ञान-भावनायै नमो नमः।
ॐ जन्म-मृत्यु-जरा-रोग-भंजनायै नमो नमः।
ॐ विधेय-मुक्त-विज्ञान-सिद्धिदायै नमो नमो नमः।
ॐ काम-क्रोधादि-षड्वर्ग-नाशनायै नमो नमः।
ॐ राजराजार्चित-पद-सरोजायै नमो नमः।
ॐ सर्व-वेदान्त-संसिद्ध-सुतत्त्वायै नमो नमः।

ॐ श्री-वीर-भक्त-विज्ञान-निधानायै नमो नमः।।१००।।

ॐ अशेष-दुष्ट-दनुज-सूदनायै नमो नमः।

ॐ साक्षाच्छ्री-दक्षिणामूर्ति-मनोज्ञायै नमो नमः।

ॐ हयमेधाग्र-संपूज्य-महिमायै नमो नमः।

ॐ दक्षप्रजापति-सुरा-वेषाढ्यायै नमो नमः।

ॐ सुम-बाणेक्षु-कोदण्ड-मण्डितायै नमो नमः।

ॐ नित्य-यौवन-पांगल्य-मंगलायै नमो नमः।

ॐ महादेव-समायुक्त-शरीरायै नमो नमः।

ॐ महादेव-रतौत्सुक्य-महादेव्यै नमो नमः।

।। इति श्रीललिताष्टोत्तरशतनामावलिः संपूर्णा।। श्रिये नमः ।।

।। श्रीललिताष्टोत्तरशतनामावलिः ।।

ॐ भूरूप-सकलाधारयै नमः।।
ॐ बीजौषध्यन्नरूपिण्यै नमः।।
ॐ जरायुजाण्डजोद्भिज्जस्वेदजादिशरीरिण्यै नमः।।
ॐ क्षेत्ररूपायै नमः।।
ॐ तीर्थरूपायै नमः।।
ॐ गिरिकाननरूपिण्यै नमः।।
ॐ जलरूपाखिलाप्यायायै नमः।।
ॐ तेजः पुंजशरीरिण्यै नमः।।
ॐ जगत्प्रकाशिकायै नमः।।
ॐ अज्ञानतमोहृद्भानुरूपिण्यै नमः।।१०।।
ॐ वायुरूपायै नमः।।
ॐ अखिलव्याप्यायै नमः नमः।।
ॐ उत्पत्यादि-विधायिन्यै नमः।।
ॐ नभोरूपायै नमः।।
ॐ इन्दु-सूर्यादि-ज्योतिर्भूतावकाशदायै नमः।।
ॐ घ्राणरूपायै नमः।।
ॐ गन्धरूपायै नमः।।
ॐ गन्धग्रहण-कारिण्यै नमः।।
ॐ रसनायै नमः।।
ॐ रसरूपायै नमः।।२०।।
ॐ रसग्रसण - कारिण्यै नमः।।
ॐ चक्षुरूपायै नमः।।
ॐ रूपरूपायै नमः।।

ॐ रूपग्रहण - कारिण्यै नमः।।

ॐ त्वग्रूपायै नमः।।

ॐ स्पर्शरूपायै नमः।।

ॐ स्पर्शग्रहण-कारिण्यै नमः।।

ॐ श्रोत्ररूपायै नमः।।

ॐ शब्दरूपायै नमः।।

ॐ शब्दग्रहण-कारिण्यै नमः।।३०।।

ॐ वागिन्द्रियस्वरूपायै नमः।।

ॐ वाचावृत्तिप्रदायिन्यै नमः।।

ॐ पाणीन्द्रिय स्वरूपायै नमः।।

ॐ क्रियावृत्तिप्रदायिन्यै नमः।।

ॐ पादेन्द्रियस्वरूपायै नमः।।

ॐ गतिप्रवृत्तिदायिन्यै नमः।।

ॐ पाय्विन्द्रियस्वरूपायै नमः।।

ॐ विसर्गार्थैक कारिण्यै नमः।।

ॐ रहस्येन्द्रिय रूपायै नमः।।

ॐ विषयानन्द दायिन्यै नमः।।४०।।

ॐ मनोरूपायै नमः।।

ॐ संकल्पविकल्पादिस्वरूपिण्यै नमः।।

ॐ सर्वोपलब्धिहेतु रूपायै नमः।।

ॐ बुद्धिनिश्चयरूपिण्यै नमः।।

ॐ अहंकार स्वरूपायै नमः।।

ॐ चित्तचेतनारूपायै नमः।।

ॐ सर्वचैतन्य दायिन्यै नमः।।

ॐ गुणवैषम्य रूपाढ्य महत्तत्त्वाभिमानिन्यै नमः।।

ॐ गुणसाम्याव्यक्तमायामूल प्रकृति संज्ञोय नमः।।५०।।

ॐ पंचीकृत महाभूतसूक्ष्मभूतस्वरूपिण्यै नमः।।

ॐ विद्याविद्यात्मिकायै नमः।।

ॐ मायाबन्धमोचन कारिण्यै नमः॥
ॐ ईश्वरेच्छारोगरूपायै नमः॥
ॐ प्रकृतिक्षोभकारिण्यै नमः॥
ॐ कालशक्त्यै नमः॥
ॐ कालरूपायै नमः॥
ॐ नियतात्मनियामिकायै नमः॥
ॐ धूम्रादिपरमव्योमात्मिकायै नमः॥
ॐ यंत्रमंत्रकलात्मिकायै नमः॥६०॥
ॐ ब्रह्मरूपायै नमः॥
ॐ विष्णुरूपायै नमः॥
ॐ रुद्ररूपायै नमः॥
ॐ महेश्वर्यै नमः॥
ॐ सदाशिवस्वरूपायै नमः॥
ॐ शिवायै नमः॥
ॐ वाणीलक्ष्म्युमारूपायै नमः॥
ॐ सदाख्यायै नमः॥
ॐ चित्कलात्मिकायै नमः॥७०॥
ॐ प्राज्ञतैजसविश्वाख्यविराट्सूत्रेश्वरात्मिकायै नमः॥
ॐ स्थूलदेहस्वरूपायै नमः॥
ॐ सूक्ष्मदेहस्वरूपिण्यै नमः॥
ॐ बाच्यवाचकस्वरूपिण्यै नमः॥
ॐ ज्ञानज्ञेयस्वरूपिण्यै नमः॥
ॐ कार्यकारणरूपायै नमः॥
ॐ तत्त्वतत्त्वाधिदेवतायै नमः॥
ॐ दशनादस्वरूपायै नमः॥
ॐ नाडीकुण्डलरूपायै नमः॥
ॐ अकारादिक्षकारान्तवैखरीवाक्स्वरूपिण्यै नमः॥८०॥
ॐ वेदवेदांगरूपायै नमः॥

ॐ सूत्रशास्त्रादिरूपिण्यै नम:।।

ॐ पुराणरूपायै नम:।।

ॐ सद्धर्मशास्त्ररूपायै नम:।।

ॐ परात्परायै नम:।।

ॐ आयुर्वेदस्वरूपायै नम:।।

ॐ धनुर्वेदस्वरूपायै नम:।।

ॐ गांधर्वविद्यारूपायै नम:।।

ॐ अर्थशास्त्रादिरूपिण्यै नम:।।

ॐ चतु:षष्टिकलारूपायै नम:।।

ॐ निगमागमरूपिण्यै नम:।।

ॐ काव्येतिहासरूपायै नम:।।

ॐ गानविद्यादिरूपिण्यै नम:।।

ॐ पदवाक्यस्वरूपायै नम:।।

ॐ सर्वभाषास्वरूपिण्यै नम:।।

ॐ पदवाक्यस्फोट रूपायै नम:।।

ॐ ज्ञानेच्छाक्रियात्मिकायै नम:।।

ॐ सर्वतन्त्रमय्यै नम:।।

ॐ सर्वतन्त्र यन्त्रादिरूपिण्यै नम:।।

ॐ वेदमात्रे नम:।।१००।।

ॐ महाव्याहृतिरूपिण्यै नम:।।

ॐ अव्याकृतपदानाद्याचिन्त्यशक्त्यै नम:।।

ॐ तमोमय्यै: नम:।।

ॐ परस्मै ज्योतिषे नम:।।

ॐ परब्रह्म साक्षात्कारस्वरूपिण्यै नम:।।

ॐ परब्रह्ममय्यै नम:।।

ॐ सत्यासत्यज्ञानसुधात्मिकायै नम:।।

ॐ श्री ललितायै नम:।।१०८।।

APPENDIX

WORSHIP OF LALITĀ

Lalitā is one of the more popular names under which the mother-goddess is worshipped. In the reckoning of the one hundred and eight or fifty-one centres of Śakti-worship in the county the name Lalitā is associated with Prayāga (the present day Allahabad in Uttar pradesh) (*Mastya-purāṇa,* 291, 26) And among the twelve major Śakti-pīṭhas recounted in Tripur*ārahasya,* Māhātmya-Khaṇḍa, chap-48, Lalitā is worshipped in Prayāga ; Kāmakshi in Kāñchīpuram, Bhrāmari in Malaya, Kumārī in Kerala, Aṁbā in the Ānarta country, Viśālākshī in Vārāṇasī, Maṅgalāvati in Gayā, Mahā-lakshmī in Karavīra (Kolhapur), Kālikā in Mālavā and Vindhya-vāsinī in the Vindhyā mountains.

Lalitā is also one of the nine forms of Gaurī, worshipped in different locations within Vārāṇasī : others being Mukha-nirmālikā, Jyeṣhṭhā, Saubhāgyā, Śriṅgārā, Viśālākshī, Bhavānī, Maṅgalā, and Mahā-lakshmī Gaurīs. *Skānda-purāṇa* (Kāśī-khaṇḍa, 70) gives Lalitā as one of the names of the mother-goddesses along with names like Viśālākshi, Śiva-dūti, Aindrī, Viśva-bhujā, Bhadrakālī, Mahā-lakshmī, Hara-siddhi, Triloka-sundarī and Chāmuṇḍī.

Among the ten great Vidyās, Lalitā is another name for Shoḍaśī. The form of Lalitā is regarded as a variant (bheda) of Tripura-sundarī, and hence known as Lalitā parā-bhaṭṭārikā or Rāja-rājeśvarī. This is also the reason why the worship of Lalitā takes the form of the worship

of Śrīchakra in its nine enclosures, and with homa prescribed for the Śrīchakra. The worship of Śrīchakra is usually accompained by the recitation of the thousand names of Lalitā (Sahasra-nāma). More particularly, Lalitā is identified with Bālā-tripura-sundari, and therefore has associations with Bālā-sarasvatī.

At the folk level, Lalitā is worshipped in the form of a 'Vrata', a chosen ritual elaborately and meticulously observed. There are two well-known vratas in the name of Lalitā, and Lalitā is here identified with Durgā ('yā durgā saiva Lalitā', *Padma-purāṇa,* Pātālakhaṇḍa). 'Lalitā-saptami' is performed on the seventh day of the first fortnight of the month Bhādrapada. Śiva and Lalitā are together worshipped in a maṇḍala. This is also known as Kukkuṭī-Vratra, and it is undertaken by those who desire progeny and welfare of the offsprings. Works like Tithyādi-tattva explain the significance of this Vrata on the basis of the legends recounted in *Bhavishyottara-purāṇa* about Nahusha, the king of Ayodhyā and his queen 'Chandramukhi having performed this vrata and having secured not only progeny but the welfare and longevity of the children, and about Devakī (the mother of Krishṇa) having performed this rite on the advice of the sage Lomaśa after her seven children were killed by Kaṁsa. The rite involves the tying of a consecrated thread with eight knots and dipped in milk to the left wrist of the devotee.

The other Vrata is known as Lalitā-pañchamī, performed every year on the fifth day of the Navarātri in the month of Aśvin (Śarannava-rātri). The background story is given in *Adbhuta-rāmāyana.* After Rāma killed the ten-headed Rāvaṇa and returned to Ayodhyā, the hundred- headed Rāvaṇa (śata-mukha-rāvaṇa) oppeared in Laṅkā and at the instance of Vibhīshaṇa, Rāma arrived in Laṅkā to fight with this demon. Rāma, however, was

worsted in the fight and on the advice of the sage Nārada, Hanumān was sent to Ayodhyā to request Sītā to help kill the demon. Sītā took the form of the mighty Lalitā and killed the hundred-headed Rāvaṇa. Rāma is said to have worshipped Sītā as Śakti on this occasion. His father Daśaratha is also said to have worshipped Lalitā before Rāma was born.

A variant of this Vrata is Upāṅga-Lalitā-pañchamī, associated with a legend in *Skanda-purāṇa*. The name 'Upāṅga' as prefix to Lalitā is derived from the ruler of the Upāṅga city, who was also named Upāṅga. Gautama of Bhṛgu-Kshetra had a son Gopati by name who began as a wastrel but was tranformed into wise, wealthy and virtuous householder as a result of having performed this Vrata in a temple to Lalitā in Upāṅga. This Vrata is described as a 'kāmya-vrata', a ceremonial meant to secure a material benefit. The Dhyāna-śloka which visualizes the goddess on the occasion emphasizes this purpose.

While worshipping Lalitā in Śrī-Chakra, the usual procedure in Tripura-sundarī-Saparyā is followed. Tripura-sundarī is identified here with Lalitā and is visualized as being accompained by the sixty-four yoginī-śaktis, who are mentioned in the Sahasra-nāma These are secondary forms of the mother-goddess Lalitā herself, and they are separately invoked for granting material benefits ('Chatus-shashṭi-śaktayas siddhi-dayikāh'). Their names are (1) Kuleśī (2) Kulānandā (3) Vāgīśī (4) Bhairavī (5) Umā (5) Śrī (7) Śāntā (8) Chaṇḍā (9) Dhūmrā (10) Kālī (11) Karālinī (12) Mahālakshmī (13) Kaṅkālī (14) Rudra-Kāli, (15) Sarasvatī, (16) Vāg-vādinī, (17) Nakulī, (18) Bhadra-Kālī (19) Śaśi-prabhā (20) Pratyaṅgirā (21) Siddhi-lakshmī (22) Amṛteśi (23) Chaṇḍikā (24) Khecharī (25) Bhūcharī (26) Siddhā (27) Kāmākshī (28) Hiṅgulā (29) Bālā (30)

Jayā (31) Vijayā (32) Ajitā (33) Nityā (34) Aparājitā (35) Vilāsinī (36) Aghorā (37) Chitrā (38) Mugdhā (39) Dhaneśvarī (40) Someśvarī (41) Mahā-chaṇḍā (42) Vidyā (43) Haṁsī (44) Vināyikā (45) Veda-garbhā (46) Bhīmā (47) Ugrā (48) Vaidyā (49) Sad-gatī (50) Ugreśvarī (51) Chaṇḍa-garbha (52) Jyotsnā (53) Satyā (54) Yaśovatī (55) Kulikā (56) Kāminī (57) Kamya (58) Jñāna-vati (59) Ḍākinī (60) Rākinī (61) Lākinī (62) Kākinī (63) Śakinī and (64) Hākinī.

An important sequence in the worship is what is known as 'shoḍhā-nyāsa', placement of the deities of six categories - Ganeśa, graha, nakshatra, yoginī, rāśi and pīṭ ha, on different parts of the devotee's body. This is followed by the sixteen ministrations (upachāra) and worship of the attendant deities in the nine enclosure of Śrī-Chakra. During the worship, the thousand names of Lalitā (sahasra-nāma) or one hundred and eight names of Lalitā (Lalitāshṭottara-śata-nāmāvalī) are recited.

OUR OTHER RELATED TITLES

Agama Encyclopaedia / S.K. Ramachandra Rao 12 Vols.

Concept of Vac in the Vedic Literature/ Pratibha M.Pingle

Glossary of Tantra Mantra and Yantra,

Introduction to Indian Astrology/ Rama R Rao,

Mantramahodadhi Of Mahidhara With his own Nauka Commentary/

Translated into English by a Board of Scholars

Navagraha Kosa/ S.K Ramachandra Rao 2 Vols,

Sarada Tilaka Tantram/ Eng. Trans. By a Board of Scholars,

Sri Chakras: Text and Plates/ S.K. Ramachandra Rao,

Sri Sukta/ Nagesh D. Sonde,

Srividya Kosa/ Prof. S.K Ramachandra Rao,

Tantrik Traditions in Tibet/ Prof. S.K. Ramachandra Rao,

The Tantric Practices in Sri Vidya/ S.K Ramachandra Rao,

Yantras- Text and Plates/ S.K. Ramachandra Rao,

Rs.600,-

ISBN 81-7030-882-8

788170 308829

Published by
Sri Satguru Publications
A Division of
Indian Books Centre
24/4, Shakti Nagar, Near Dena Bank, Delhi-110007